(*c*) ‡भक्ष्, when it has not the sense of हिंसा 'injury to a sentient thing,' governs the Instrumental; as, भक्षयति पिंडीं देवदत्तः, भक्षयति पिंडीं देवदत्तेन; but भक्षयंति यवान् बलीवर्दाः, भक्षयति बलीवर्दान् यवान् (Mbh.).

(*d*) The roots स्मृ and घ्रा, which denote particular kinds of 'knowledge' or 'perception,' are not used with the Accusative; as, स्मरति-जिघ्रति-देवदत्तः, स्मारयति-घ्रापयति-देवदत्तेन.

Sometimes, however, the Accusative also is used in the case of the root स्मृ, especially when it means 'to think of or remember with regret'; as, अपि चंद्रगुप्तदोषा अतिक्रांतपार्थिवगुणान् स्मारयन्ति प्रकृतीः (Mu. 1); see S'i. VI. 56 also.

(*e*) *दृश् is construed with the Accusative in the causal; as, भक्ता हरिं पश्यन्ति, दर्शयति भक्तान् हरिं (S. K.).

Obs. दृश् in classical literature is sometimes found used with the Dative, instead of the Accusative; as, प्रत्यभिज्ञानरत्नं च रामायादर्शयत् कृती (R. XII. 64).

(*f*) †The subject of the verb in the primitive sense in the case of हृ and कृ, and of अभिवद् and दृश् when used in the Atmanepada, is either put in the Accusative or Instrumental case in the causal; *e.g.*,

भृत्यः कटं करोति हरति वा ।	भृत्यं भृत्येन वा कटं कारयति हारयति वा। (S. K.)
The servant makes or takes a mat.	(He) causes the servant to make or take a mat.

So अभिवादयते-दर्शयते-देवं भक्तं-भक्तेन वा। (S. K.) (He) makes the devotee bow down to, or see, the God.

§ **46.** By 'intransitive' roots mentioned in § 44 is meant such roots as are not by their nature capable of governing an object other than that of 'time,' 'place' &c., and not those roots which, though transitive, may sometimes be

---

‡ भक्षेरहिंसार्थस्य न । (Vār.)

* दृशेश्च । (Vār.)

† हृक्रोरन्यतरस्याम् । (I.4.53).अभिवादिदृशोरात्मने पदे वेति वाच्यम् ।

used intransitively according to the speaker's volition, or when their meaning is quite evident; as, किंकरः पचति. Here पचति, though transitive, is used without an object, because it can be easily understood; hence, किंकरेण पाचयति and not किंकरं; but मासमासयति देवदत्तं.

§ 47. ‡In forming the passive construction of causal verbs, the *principal* object in the causal, which is the *subject* (agent) of the verb in its primitive sense, is put in the Nominative case, and the other *object* remains unchanged; *e.g.*,

Primitive	Causal Active	Causal Passive
रामो ग्रामं गच्छति। Ràma goes to a village.	रामं ग्रामं गमयति। (He) causes Ràma to go to a village.	रामो ग्रामं गम्यते। Ràma is caused to go &c.
भृत्यः कटं करोति। The servant prepares a mat.	भृत्येन भृत्यं वा कटं कारयति। (He) causes the servant to prepare a mat.	भृत्यः कटं कार्यते। The servant is made to prepare &c.
गोविन्दो मासमास्ते। Govind sits for one month.	गोविन्दं मासमासयति। (He) makes Govind sit &c.	गोविन्दो मासमास्यते। Govind is made to sit &c.

(*a*) But in the case of roots that imply 'knowledge,' 'eating,' and those that have a literary work for their object the principal object is put in the Nominative case, and the secondary in the Accusative or *vice versa*; *e.g.*,

माणवकं धर्मं बोधयति 'he makes Mànavaka know his duty'; माणवको धर्मं बोध्यते or माणवकं धर्मो बोध्यते 'M. is made to know duty,' or 'duty is made known to M.' बटुमोदनं भोजयति 'he makes the boy eat food'; बटुरोदनं भोज्यते or बटुमोदनो भोज्यते (S. K.).

---

§ 48. The causal forms of roots of the tenth conjugation are the same as the primitive forms, and the meaning must

‡ बुद्धिभक्षार्थयोः शब्दकर्मणां च निजेच्छया।
प्रयोज्यकर्मण्यन्येषां ण्यन्तानां लादयो मताः॥ (S. K.)

be decided by the context; as, रामो धनं चोरयति 'Ràma steals wealth'; रामो गोविंदेन धनं चोरयति 'Ràma causes Govinda to steal wealth.' In the latter sentence the verb has a causal sense.

§ 49. With regard to roots that govern two accusatives the rules mentioned in § 43 and § 44 hold good in their case also; *i.e.*, those roots that imply motion &c., govern the Accusative of the subject of the primitive base, and others the Instrumental case, subject to § 45; as, वामनो बलिं वसुधां याचते; (ईश्वरो) वामनेन बलिं वसुधां याचयति '(God) makes Vàmana ask Bali for Earth; गोपोऽजां नगरं हरति; (स्वामी) गोपं गोपेन वाजां नगरं हारयति '(The master) makes the cowherd take the sheep to the town.'

अभिमन्युतनयं परीक्षितमुदरादुपरतमेव निर्गतमुत्तराप्रलापोपजनितकृपो भगवान् वासुदेवो दुर्लभानसून् प्रापितवान् । (K. 175)

अयं शिशुर्न शक्नोति शिरोधरां धारयितुम् । तदेहि गृहाणेममवतारय सलिलसमीपमित्यभिधाय तेनर्षिकुमारेण मां सरस्तीरमनाययत् । उपसृत्य च जलसमीपं स्वयं मामादाय मुक्तप्रयत्नमुत्तानितमुखमङ्गुल्या कतिचित्सलिलबिन्दूनपाययत् । (K. 38)

काम इदानीं सकामो भवतु येनासत्यसंधे जने सखी पदं कारिता ।
(S'. 4)

महेन्द्रभवनं गच्छतोपाध्यायेन त्वमासनं प्रतिग्राहितः । (V. 3)

तौ कुशलवौ भगवता वाल्मीकिना धात्रीकर्मवस्तुतः परिगृह्य पोषितौ परिरक्षितौ च । वृत्तचूडौ च त्रयीवर्जमितरा विद्याः सावधानेन परिपाठितौ । समनन्तरं च गर्भादेकादशे वर्षे क्षात्रेण कल्पेनोपनीय गुरुणा त्रयीविद्यामध्यापितौ । (U. 2)

नलिनिके पायय कमलमधुरसं कलहंसान् । पल्लविके भोजय मरिचाग्रपल्लवदलानि भवनहारीतान् । (K. 184)

आर्यो दापयतु मे वैशंपायनानयनाय गमनाभ्यनुज्ञां तातेन । नान्यथा मे दोषशुद्धिर्भवति । (K. 202)

तौ दंपती स्वां प्रति राजधानीं
प्रस्थापयामास वशी वसिष्ठः । (R. II. 70)

ततो द्रोणोऽर्जुनं भूयो रणशिक्षामशिक्षयत् । (Mb. I. 130. 25)

तौ दंपती वहु विलप्य शिशोः प्रहर्त्रा
शल्यं निखातमुदहारयतामुरस्तः । (R. IX. 78)

वाल्मीकिस्तौ कुशलवौ
सांगं च वेदमध्याप्य किंचिदुत्क्रांतशैशवौ ।
स्वकृतिं गापयामास कविप्रथमपद्धतिम् ।(R. XV. 33)

स सेतुं बंधयामास प्लवगैर्लवणांभसि ।
तेनोत्तीर्य पथा लंकां रोधयामास पिंगलैः ।
द्वितीयं हेमप्राकारं कुर्वद्भिरिव वानरैः ॥ (R. XII. 70. 1)

ADDITIONAL SENTENCES FOR EXERCISE

एवं क्रियते युष्मदादेशः । किंतु या यस्य युज्यते भूमिका तां तथैव भावेन सर्वे वर्ग्याः पाठिताः । (Mal. 1)

स कार्तान्तिकस्तां विलोक्य स्निग्धदृष्टिराचष्ट । भद्रे अस्ति कौशलं शालिप्रस्थेनानेन संपन्नमाहारमस्मानभ्यवहारयितुमिति । (Dk. II. 6.)

ततो मया पाटलिपुत्रं गत्वा श्रावितोऽमात्यसंदेशं वैतालिकः स्तनकलशः । (Mu. 4.)

रजनीतिमिरावगुण्ठिते पुरमार्गे घनशब्दविक्लवाः ।
वसतिं प्रिय कामिनां प्रियास्त्वदृते प्रापयितुं क ईश्वरः ॥ (Ku.IV.11)

तामर्चिताभ्यः कुलदेवताभ्यः कुलप्रतिष्ठां प्रणमय्य माता ।
अकारयत् कारयितव्यदक्षा क्रमेण पादग्रहणं सतीनाम् ॥ (Ku.VII.27)

प्रियागुणसहस्राणामेकोन्मीलनपेशलः ।
य एव दुःस्मरः कालस्तमेव स्मारिता वयम् ॥ (U. 6)

शरैरुत्सवसंकेतान् स कृत्वा विरतोत्सवान् ।
जयोदाहरणं बाह्वोर्गापयामास किन्नरान् ॥ (R. IV. 78)

अथानाथाः प्रकृतयो मातृबंधुनिवासिनम् ।
मौलैरानाययामासुर्भरतं स्तम्भिताश्रुभिः ॥ (R. XII. 12)

त्वं रक्षसा भीरु यतोऽपनीता तं मार्गमेताः कृपया लता मे ।
अदर्शयन् वक्तुमशक्नुवत्यः शाखाभिरावर्जितपल्लवाभिः ॥ (R.XIII.24)

गुणानुरक्तामनुरक्तसाधनः
कुलाभिमानी कुलजां नराधिपः ।
परैस्त्वदन्यः क इवापहारये-
न्मनोरमामात्मवधूमिव श्रियम् ॥ (Ki. I. 31)

यः पयो दोग्धि पाषाणं स रामाद्भूतिमाप्नुयात् ।
रावणं गमय प्रीतिं बोधयन्तं हिताहितम् ॥
प्रीतोऽहं भोजयिष्यामि भवतीं भुवनत्रयम् ।
किं विलापयसेऽत्यर्थं पार्श्वे शायय रावणम् ॥
आज्ञां कारय रक्षोभिर्मां प्रियाण्युपहारय ।
कः शक्रेण कृतं नेच्छेदधिमूर्धानमञ्जलिम् ॥ (Bk. VIII. 82–4)

विद्यामथैनं विजयां जयां च रक्षोगणं क्षिप्तुमविक्षतात्मा ।
अध्यापयद्गाधिसुतो यथावन्निघातयिष्यन्युधि यातुधानान् ॥(Bk.II.21)

We made him know (विद्) his duty, and sent (*caus.* of स्था with प्र) him home.

When the desire of independence enters the heart of a minister, he will make the king himself lose (त्यज्) his life.

Having vanquished his foe in the battle, he made his bards sing (गै) the glory of his warlike deeds.

He caused his servants to bring (नी or हृ) fuel from the market.

It is no wonder that the tributary princes are made by the Emperor to obey his commands.

These persons were told to get garlands prepared by those maid-servants.

When a student is made to know the theory of a subject, he is taught the practice of it.

Overcome your enemies and make them pay (दा) you tributes.

He caused a large *mandap* to be erected (कृ) by his servants for the marriage of his son.

He made the boy eat (अद् or खाद्) food against his will.

I showed (*caus.* of दृश्) my library to my distinguished guest.

He makes Ràma ask the pilgrims the way to Benares.

The sheep were caused by the master to be taken (वह्) to the village by his servant.

A lord should be made by a servant to give him rewards, by adapting himself to his will.

I caused them to stand round the king, and made them salute (*caus.* of वद् with अभि) him.

LESSON VI

The Instrumental Case

§ 50. *The Instrumental case in Sanskrit has two principal senses: it either denotes the *agent* of an action, or the *instrument* or *means* by which the action is done; as, ततो देव्या किमभिहितं (Ve. 1) 'then what was said by the Queen'? संचूर्णयामि गदया न सुयोधनोरू (Ve. 1) 'shall I not reduce to powder the thighs of Suyodhana with my club'?

---

* कर्तृकरणयोस्तृतीया। (II. 3. 18)

तामेव दिव्ययोषितं चक्षुषा पुनर्निरूपयामास (K. 131) 'again looked at that very celestial woman with his eye.'

§ 51. The instrumentality, which this case denotes, may be expressed by various relations :—

(*a*) The *manner* of doing an action, or an attribute which characterizes a noun; as, आत्मानुरूपां विधिनोपयेमे (Ku. I. 18) 'he married (her) worthy of himself according to the rite'; प्रकृत्या दर्शनीयः (Mbh.) 'lovely by nature'; माठरोस्मि गोत्रेण (*ibid.*) 'I am a Māthara by my family name'; विषमेण धावति (*ibid.*) 'walks unevenly'; similary द्विद्रोणेन धान्यं क्रीणाति, साहस्रेण पशुन् क्रीणाति, शतेन शतेन पाययति वत्सान्, &c.

(*b*) The price at which a thing is bought; as, कियता मूल्येन क्रीतं पुस्तकं 'at what price was the book bought'?

(*c*) With verbs indicating *motion*, the conveyance becomes the instrument; as, आत्मनः पदं विमानेन विगाहमानः (R. XIII. 1) 'passing through his own abode (the sky) in a balloon.'

(*d*) With verbs of *carrying* or *placing*, that on which a thing is carried or placed is put in the Instrumental; as, स श्वानं स्कंधेनोवाह (H. 4) 'he bore the dog on his shoulder.' भर्तुराज्ञां मूर्ध्ना आदाय (Ku. III. 22) 'placing his master's order on his head.'

(*e*) With words of 'swearing,' that in whose name the oath is taken, becomes the instrument; as, जीवितेनैव शपामि ते (K. 233) 'I swear to thee by my very life.'

(*f*) The direction of route followed to go to a particular place also becomes the instrument; as, कतमेन दिग्भागेन गतः स जाल्मः (V. 1.) 'in what direction did the rogue go'?

§ 52. With verbs implying '*excelling*' and '*resembling*' the Instrumental is used with the qualities in which the excellence consists, or the points or particulars referred to in the resemblance; as, पूर्वान्महाभाग तयातिशेषे (R. V. 14) 'O you fortunate one, you excel your ancestors in that

(devotion)'; स्वरेण रामभद्रमनुहरति (U. 4) 'resembles Ràma in his voice.'

Obs. Sometimes the Locative is used in the same sense; as, धनदेन समस्त्यागे सत्ये धर्म इवापरः (Ràm. I. 19) 'equal to Kubera in (point of) charity (munificence), and like another Dharma (a second Dharma) in truthfulness.'

(*a*) Words implying 'separation from', are usually construed with the Instrumental; as, अयमेकपदे तया वियोग उपनतः (V. 4) 'here is this separation from her suddenly fallen to my lot'; so मा भूदेवं क्षणमपि च ते विद्युता विप्रयोगः (Me. 118).

(*b*) Words expressing '*likeliness*' or '*equality*' are also used with this case; as, धनदेन समस्त्यागे 'equal to Kubera in munificence'; अस्य मुखं सीताया मुखचंद्रेण संवदति (U. 4) 'his face corresponds to (is just as similar as) the moonlike face of Sîtà.' *See* under Genitive also.

§ 53. *The Instrumental is used with words expressive of *time* or *place* when the accomplishment of the desired object is meant to be expressed; as, द्वादशवर्षैर्व्याकरणं श्रूयते (P. I.) 'grammar is learnt in twelve years'; क्रोशेन पाठस्तेनाधीतः (S. K.) 'the lesson was learnt by him in (*i.e.*, by going over) a *Koss*.'

§ 54. †When a noun denotes the *cause* or *motive* of a thing or action, as distinguished from the *means* or *instrument*, it is put in the Instrumental case; as, गुरौ भक्त्या प्रीतास्मि ते (R. II. 63) 'I am pleased with thee for thy devotion to thy preceptor'; अतिदवीयस्तया च तस्य प्रदेशस्य न किंचिद्ददर्श (K. 126) 'the place being very far off, he could not see anything.'

(*a*) The *object* or *purpose* also is put in the Instrumental case; as, अध्ययनेन वसति (S. K.) 'dwells with the view (for the purpose) of studying.'

---

* अपवर्गे तृतीया । (II. 3. 6)

† हेतौ । (II. 3. 23)

Obs. The Instrumental, which is used with verbs meaning 'to be satisfied', 'to rejoice at', 'to be astonished at', 'to be ashamed of', is accounted for by this rule; as, कापुरुष: स्वल्पकेनापि तुष्यति (P. I. 1) 'a low person is pleased even with little'; उभयोर्न तथा लोक: प्रावीण्येन विसिष्मिये (R. XV. 68) 'the people did not so much wonder at the proficiency of both of them'; अनेन प्रागल्भ्येन लज्जे (K. 193) 'I am ashamed of this boldness.'

§ 55. †Attributives, which show some defect of the body, govern the defective limb in the Instrumental case; as, अक्ष्णा काण: (S. K.) 'blind of one eye'; so, पादेन खंज:, कर्णेन बधिर: &c.

§ 56. ‡ An attribute, which indicates the existence of a particular state or condition, is put in the Instrumental case to express this relation; as, जटाभिस्तापस: (S. K.) 'he is an ascetic by (the fact of his having) matted hair.'

§ 57. अलं and कृतं meaning *'enough'* govern this case; as, अलमतिविस्तरेण (Ve. 1) 'enough of prolixity;' कृतमश्वेन (U. 4.) 'away with the horse;' तस्मात्कृतं चरणपातविडंबनाभि: (P. IV. 1.)

(*a*) In this sense अलं is often used with a gerund; as, अलमन्यथा गृहीत्वा (M. 1) 'enough of misunderstanding (do not misunderstand).' In such cases it has a prohibitive force.

§ 58. * Words like सह, साकं, सार्धं, समं &c. having the sense of 'companionship' govern the Instrumental case of that which expresses the accompaniment of the principal subject of assertion; as, त्वया सह निवत्स्यामि वनेषु (U. 2) 'I shall dwell with thee in forests'; अमरसिंधु: सार्धमस्मद्विधाभि: (U. 3) 'the heavenly river with persons like us'; आस्स्व साकं मया सौधे (Bk. VIII. 79) 'sit with me on the mansion.'

---

† येनांगविकार: । (II. 3. 20)
‡ इत्थंभूतलक्षणे । (II. 3. 21)
* सहयुक्तेऽप्रधाने । (II. 3. 19)

§ 59. Words like किं, कार्यं, अर्थः, प्रयोजनं, गुणः &c. expressing *use* or *need*, and the root कृ with किं when used in this sense, govern the Instrumental of that which is used or needed and the Genitive of the user; as, देवपादानां सेवकैर्न प्रयोजनं (H. 1) 'your Majesty's feet have no need of servants'; तृणेन कार्यं भवतीश्वराणां (P. I. 1) 'of rich persons (even) some purpose is served by a blade of grass'; किं तया क्रियते धेन्वा (P. I.) 'what is to be done with that cow'? किं तया दृष्टया (S'. 2) 'what is the good of seeing her'? अप्राज्ञेन सानुरागेण भृत्येन को गुणः (Mu. 1) 'what is the use of a devoted but foolish servant'?

Obs. Pāṇini mentions दिवः कर्म च (I. 4. 43), *i.e.*, दिव् '*to play*' governs the acc. or instr.; as, अक्षैरक्षान्वा दीव्यति 'he plays at dice'; also, संज्ञोऽन्यतरस्यां कर्मणि (II. 3. 22); पित्रा पितरं वा संजानीते 'he lives in harmony with his father.'

अलमलं बहु विकत्थ्य। राज्ञः समक्षमेवावयोरधरोत्तरव्यक्तिर्भविष्यति। (M. 1)

देवेन देव्या च परिगृहीतोऽहममुना हरदत्तेन प्रधानपुरुषसमक्षमयं न मे पादरजसा तुल्य इत्यधिक्षिप्तः (M. 1)

शापितासि मम लवंगिकावलोकितयोर्जीवितेन यदि वाचा न कथयसि (Mal. 8)

आगंतुकतयाऽश्रुतपूर्व आवाभ्यामेष वृत्तांतः। (S'. 6)

भगवति तमसे अयं (करिकलभकः) तावदीदृशः संपन्नः।
तौ पुनर्न जाने कुशलवावेतावता कालेन कीदृशाविव भवतः। (U. 3)

चंद्रापीडस्य सहपांशुक्रीडिततया सहसंवृद्धतया च सर्वविश्रंभस्थानं द्वितीयमिव हृदयं वैशंपायनः परं मित्रमासीत्। (K. 76)

अलमतियंत्रणया। कृतमतिप्रसादेन। भगवति प्रसीद विमुच्यतामयमत्यादर इति तामब्रवात्। (K. 133)

उषसि चोत्थाय तस्य जरद्द्रविडधार्मिकस्येच्छया निसृष्टैर्धनविसरै-पूरयित्वा मनोरथमभिमतमभिरमणीयेषु प्रदेशेषु निवसन्नल्पैरेवाहोभिरुज्जयिनीमाजगाम। (K. 229)

अलमुपालम्य। आर्य दैवेनेदमनुष्ठितं किमत्रार्यस्य। (Mu. 3)

अयि पंचालतनये अलं विषादेन। किं बहुना। यत्करिष्ये तच्छ्रूयताम्। अचिरेणैव कालेन सुयोधनशोणितशोणपाणिस्तव कचान् भीम उत्तंसयिष्यति। (Ve. 1)

स्वहृदयेनापि विदितवृत्तांतेनामुना जिह्रेमि। (K. 233)

प्रवातशयने निषण्णा देवी परिजनहस्तगृहीतेन चरणेन परिव्राजिकया कथाभिर्विनोद्यमाना तिष्ठति। (Mk. 4)

मदनमपि गुणैर्विशेषयंती
रतिरिव मूर्तिमती विभाति सेयम्। (Mk. 4)

शुद्धांतदुर्लभमिदं वपुराश्रमवासिनो यदि जनस्य।
दूरीकृताः खलु गुणैरुद्यानलता वनलताभिः॥ (S'. 1)

शरीरसादादसमग्रभूषणा मुखेन सालक्ष्यत लोध्रपांडुना।
तनुप्रकाशेन विचेयतारका प्रभातकल्पा शशिनेव शर्वरी॥
(R. III. 2)

यो मामजमनादिं च वेत्ति लोकमहेश्वरम्।
असंमूढः स मर्त्येषु सर्वपापैः प्रमुच्यते॥ (Bg. X. 3)

किं तया क्रियते धेन्वा या न सूते न दुग्धदा।
कोऽर्थः पुत्रेण जातेन यो न विद्वान् न भक्तिमान्॥ (P. 1)

ADDITIONAL SENTENCES FOR EXERCISE

अधुनाऽन्या गतिर्नास्ति। अकथ्यमाने च महाननर्थोपनिपातो जायते प्राणपरित्यागेनापि रक्षणीयाः सुहृदसव इति कथयामि। (K. 152)

तेषु तेषु रम्यतरेषु स्थानेषु तया सह तानि तान्यपरिसमाप्तान्यपुनरुक्तानि न केवलं चन्द्रमाः कादंबर्या सह कादंबरी महाश्वेतया सह महाश्वेता तु पुण्डरीकेण सह पुण्डरीकोऽपि चन्द्रमसा सह परस्परावियोगेन सर्व एव सर्वकालं सर्वसुखान्यनुभवन्तः परां कोटिमानन्दस्याध्यगच्छन्। (K. 369)

अवधूतप्रणिपाताः पश्चात्संतप्यमानमनसोऽपि ।
निभृतैर्व्यपत्रपन्ते दयितानुनयैर्मनस्विन्यः ॥ (V. 3)

कष्टं जनः कुलधनैरनुरञ्जनीयस्तन्नो यदुक्तमशिवं न हि तत्क्षमं ते ।
नैसर्गिकी सुरभिणः कुसुमस्य सिद्धा मूर्ध्नि स्थितिर्न चरणैरवताडनानि ॥(U. 1)

अथ दुर्लंघ्यशासनतया भगवतो मनोभुवो मदजननतया च मधुमासस्यातिरमणीयतया च तस्य प्रदेशस्याविनय बहुलतया चाभिनवयौवनस्य चंचलप्रकृतितया चेन्द्रियाणां दुर्निवारतया च विषयाभिलाषाणां तथा भवितव्यतया च तस्य तस्य वस्तुनस्तमपि तरलतामनयदनंगः। (K. 143)

विनाऽप्यर्थैर्वीरः स्पृशति बहुमानोन्नतिपदं
समायुक्तोऽप्यर्थैः परिभवपदं याति कृपणः ।
स्वभावादुद्भूतां गुणसमुदयावाप्तिविषयां
द्युतिं सैंहीं किं श्वा धृतकनकमालोऽपि लभते ॥ (H. 1)

अलं महीपाल तव श्रमेण प्रयुक्तमप्यस्त्रमितो वृथा स्यात् ।
न पादपोन्मूलनशक्ति रंहः शिलोच्चये मूर्च्छति मारुतस्य ॥ (R. II. 34)

कुलेन कांत्या वयसा नवेन गुणैश्च तैस्तैर्विनयप्रधानैः ।
त्वमात्मनस्तुल्यममुं वृणीष्व रत्नं समागच्छतु काञ्चनेन ॥ (R. VI. 79.)

लोभश्चेदगुणेन किं पिशुनता यद्यस्ति किं पातकैः
सत्यं चेत्तपसा च किं शुचि मनो यद्यस्ति तीर्थेन किम् ।
सौजन्यं यदि किं गुणैः स्वमहिमा यद्यस्ति किं मंडनैः
सद्विद्या यदि किं धनैरपयशो यद्यस्ति किं मृत्युना ॥ (Bh. II. 55)

अयमार्यचाणक्यस्तिष्ठति—
यो नन्दमौर्यनृपयोः परिभूय लोक-
मस्तोदयौ प्रतिदिशन्नविभिन्नकालम् ।
पर्यायपातितहिमोष्णमसर्वगामि
धाम्नाऽतिशाययति धाम सहस्रधाम्नः ॥ (Mu. 3)

भूषणाद्युपचारेण प्रभुर्भवति न प्रभुः ।
परैरपरिभूताज्ञस्त्वमिव प्रभुरुच्यते ॥ (Mu. 3)

आज्ञा कीर्तिः पालनं ब्राह्मणानां ज्ञानं भोगो मित्रसंरक्षणं च ।
येषामेते षड्गुणा न प्रवृत्ताः कोऽर्थस्तेषां पार्थिवोपाश्रयेण ॥ (Bh. II. 48)

न तेन सज्जं क्वचिदुद्यतं धनुः कृतं न वा कोपविजिह्ममाननम् ।
गुणानुरागेण शिरोभिरुह्यते नराधिपैर्माल्यमिवास्य शासनम् ॥ (Ki. I. 21.)

समुद्र इव गांभीर्ये स्थैर्ये च हिमवानिव ।
विष्णुना सदृशो वीर्ये क्षमया पृथिवीसमः ॥ (Ràm. I. 1. 17–8)

स बाल आसीद्वपुषा चतुर्भुजो मुखेन पूर्णेन्दुनिभस्त्रिलोचनः ।
युवा कराक्रान्तमहीभृदुच्चकैरसंशयं संप्रति तेजसा रविः ॥ (S'i. I. 70)

A king should protect his subjects according to the rules laid down by Manu.

Morality says that one should save the life of his friend even at the cost of his own life.

This man is avarice incarnate; he will never be satisfied with hoarding money.

Are you not ashamed of your ignorance, and do you boast of your noble birth, not attended with knowledge?

This king excels all others in bravery, knowledge, and a desire to keep his subjects contended.

That your orders are borne by other kings on their heads is one great sign of your sovereignty.

The man took the lamb on his shoulder, and went by this road to the slaughter-house.

I swear by my tutelary deity that I have never before seen your ring.

I know my servants will come back within fifteen days; for what is the use of their staying there longer?

Even a sinner is freed from all his sins by repeating but once the syllable *om* through ardent devotion.

What is the use of walking with this man? He is lame of his right leg and cannot walk swiftly.

Away with doubts in this respect. This matter is all but agreed to by my sister's husband.

Fie upon you, fool! What is the use of this burden of books to you if you do not read them?

Do not (अलं) censure me; this was not done by me.

Child, do not (अलं) weep; when thy mother comes here, I shall cause thee to be fed with food by her.

Shakuntalà did not notice the approach of Durvàsa on account of her thinking of her lover.

O blind man, what is the use of this lamp to you?

LESSON VII

The Dative Case

§ 60. The person to whom something is given is called संप्रदान. A noun denoting संप्रदान is put in the Dative case; as, किं वस्तु विद्वन् गुरवे प्रदेयं (R. V. 18) 'Oh learned Sir, what is to be given to the preceptor'? The person or thing with reference to whom or having in view which an action is done is also संप्रदान; as, युद्धाय संनह्यते (Mbh.) 'he prepares for battle'; तां नंदनाय प्रार्थयते (Màl.) 'he demands her for Nandana.'

(*a*) *In the case of the root यज् 'to sacrifice' or 'to give as in a sacrifice,' the person to whom the sacrifice is offered is put in the Accusative, and the thing or means by which it is made is put in the Instrumental; as, पशुना रुद्रं यजते (S. K.) 'he sacrifices a bull to Rudra.'

§ 61. †In the case of the root रुच् 'to like' and others

---

* यजेः कर्मणः करणसंज्ञा संप्रदानस्य च कर्मसंज्ञा। (Vàr.)

† रुच्यर्थानां प्रीयमाणः (I. 4. 33)

having the same signification, the person or thing that is pleased or satisfied is put in the Dative case; as, यत्प्रभविष्णवे रोचते (S'. 2) 'what pleases your Lordship'? यज्ञदत्ताय स्वदतेऽपूप: (Kàs'ikà) 'Yajnadatta likes *Apùpa*.'

§ 62. ‡The person to whom something is due (the creditor) in the case of the root धृ (10 cl.) 'to owe' and the thing desired in the case of स्पृह्, are put in the Dative case; as वृक्षसेचने द्वे धारयसि मे (S'. 1) 'thou owest me two sprinklings of trees'; परिक्षीणो यवानां प्रसृतये स्पृहयति (Bh. III.45) 'an impoverished person desires a handful of barley-corns.'

Obs. Derivatives from स्पृह् are sometimes construed with the Dative; as, भोगेभ्य: स्पृहयालव: (Bh. III. 64) 'desirous of enjoyments'; कथमन्ये करिष्यन्ति पुत्रेभ्य: पुत्रिण: स्पृहां (Ve. 3); but generally with the Locative; स्पृहावती वस्तुषु केषु मागधी (R. III. 5).

§ 63. *The roots क्रुध्, द्रुह्, ईर्ष्य्, असूय्, and others having the same sense, govern the Dative of the person against whom the feeling of anger, hatred, malice, &c., is directed; as, हरये क्रुध्यति-द्रुह्यति-ईर्ष्यति-असूयति वा (S. K.) 'he is angry with, or bears hatred towards, Hari.' But क्रुध् and द्रुह्, when preceded by prepositions, govern the Accusative; as, मच्छरीरमभिद्रोग्धुं (Mu. 1) 'to do injury to my person'; न खलु तामभिक्रुद्धो गुरु: (V. 3) 'did not the preceptor get angry with her'?

§ 64. †In the case of the root श्रु with प्रति or आ meaning 'to promise,' the person to whom something is promised, is put in the Dative case; as, प्रतिशुश्राव काकुत्स्थस्तेभ्यो विघ्नप्रतिक्रियां (R. XV. 4) 'Kàkutstha promised them the removal of obstacles.'

---

‡ धारेरुत्तमर्ण: । स्पृहेरीप्सित: । (I. 4. 35-6)

* क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोप: । क्रुधद्रुहोरुपसृष्टयो: कर्म । (I. 4. 37-8.)

† प्रत्याङ्भ्यां श्रुव: पूर्वस्य कर्ता । (I. 4. 40.)

§ 65. ‡The purpose for which an action is done, or that for making which another thing exists or is used (as a thing made for a certain purpose) is put in the Dative case; as, काव्यं यशसे (Kāv. 1) 'a poem (is composed) for fame'; यूपाय दारु (Mbh.) 'wood is for (making) post'; कुंडलाय हिरण्यं (*ibid.*) 'gold is (used) for Kundala ornament'; अवहननाय उलूखलं (*ibid.*) 'a mortar for pounding down.'

(*a*) ¶When the sense of an infinitive of purpose is suppressed in a sentence, the object of this infinitive is put in the Dative case; as, फलेभ्यो याति = फलान्याहर्तुं याति 'he goes for fruits' *i.e.* 'to bring fruits'; वनाय गां मुमोच = वनं गंतुं गां मुमोच 'he let loose the cow for (*i.e.* to go to) the forest.' Here फल and वन, the objects of the infinitives आहर्तुं and गंतुं, are put in the Dative.

(*b*) §The Dative of an abstract noun is often used to express the sense of the infinitive of purpose from the root; as, यागाय याति = यष्टुं याति 'he goes to offer a sacrifice'; so समिदाहरणाय प्रस्थिता वयं (S'. 1); यतिष्ये वः सखीप्रत्यानयनाय (V. 1).

§ 66. *In the case of the root क्लृप् 'to be adequate to', 'to bring about', 'to tend to', and roots having a similar sense, such as संपद्, भू, जन्, the result brought about, or the end to which anything leads, is put in the Dative case; as, कल्पसे रक्षणाय (S'. 5) 'thou art adequate to bring about (our) protection'; मूत्राय कल्पते-जायते-संपद्यते यवागूः (Mbh.) 'gruel tends to (produce) urine.' The Dative is frequently used in this sense without भू or अस्; as, यस्ततौ स्वल्पदुःखाय (P. I.) 'since they two cause very little pain.'

(*a*) †That which is foreboded by a portentous pheno-

---

‡ तादर्थ्ये चतुर्थी वाच्या। (Vār.)

¶ क्रियार्थोपपदस्य च कर्मणि स्थानिनः। (II. 3. 14.)

§ तुमर्थाच्च भाववचनात्। (II. 3. 15.)

* क्लृपि संपद्यमाने च। (Vār.)

† उत्पातेन ज्ञापिते च (Vār.)

menon is also put in the Dative case; as वाताय कपिला विद्युत् (Mbh.) 'the twany lightning forebodes a hurricane' मांसौदनाय व्याहरति मृगः (*ibid.*) 'the sound of a deer indicates (the getting of) food of flesh.'

(*b*) With the words हित and सुख the Dative is used; as, ब्राह्मणाय हितं-सुखं (S. K.) 'good for a Bráhma*n*a'; हितमामयाविने (Mbh.) 'good for a sickly person.'

Obs. हित in the sense of 'good in or to' is used with the Locative and Genitive also.

§ 67. ‡The words नमः, स्वस्ति, स्वाहा, स्वधा, and वषट् (terms used in offering oblations to Gods &c.), and अलं in the sense of '*a match for*', '*sufficient for*' govern this case; as, नमो विश्वसृजे तुभ्यं (R. X. 16) 'a bow to you who created the universe'; स्वस्ति भवते (M. 2) 'good-bye to you'; अग्नये स्वाहा (S. K.) 'this offering to Agni'; similarly पितृभ्यः स्वधा, इंद्राय वषट्; दैत्येभ्यो हरिरलं (S. K.) 'Hari is a match for the demons'; अलमेषा क्षुधितस्य (मे) तृप्त्यै (R. II. 39) 'this (cow) is sufficient to satisfy me who am hungry.'

(*a*) Words having the sense of अलं 'sufficient for', 'able to do', such as प्रभु, शक्त and even the verb प्रभू, are used with the Dative; as, प्रभुर्मल्लो मल्लाय, शक्तो मल्लो मल्लाय, प्रभवति मल्लो मल्लाय (Mbh.) 'one wrestler is a match for another'; विधिरपि न येभ्यः प्रभवति (Bh. II. 94) 'over whom even the Creator does not prevail.'

(*b*) नमः joined to कृ generally governs the Accusative, but sometimes the Dative also; as, मुनित्रयं नमस्कृत्य (S. K.) 'saluting the three sages'; but नमस्कुर्मो नृसिंहाय (*ibid.*) 'we salute N*r*isimha.'

(*c*) Roots meaning 'to salute,' such as प्रणिपत्, प्रणम् are construed with the Dative or Accusative; as, धातारं प्रणिपत्य (Ku. II. 3) 'saluting the Creator'; also तस्मै प्रणिपत्य नंदी (Ku. III. 60), आर्यं प्रणिपत्य (Mu. 1); so, तां भक्तिप्रवणेन चेतसा

---

‡ नमःस्वस्तिस्वाहास्वधालंवषड्योगाच्च । (II. 3. 16)

प्रणनाम (K. 228); तां कुलदेवताभ्यः प्रणमय्य (Ku. VII. 27); प्रणम्य त्रिलोचनाय (K. 131).

Note.—Classical authors occasionally use the nouns also derived from these verbs with the Dative; as, मूर्ध्ना प्रणामं वृषभध्वजाय चकार (Ku. III. 62); अस्मै प्रणाममकरवम् (K. 142), तस्मै दंडप्रणाममकरवम् (Dk. I. 2).

(*d*) In greeting and in expressing a blessing the Dative is used with words like स्वागतं, कुशलं; as देवदत्ताय कुशलं (Mbh); स्वागतं देव्यै (M. 1) 'welcome to the Queen.' Words like कुशलं, भद्रं, सुखं &c. are used with the Genitive also. *See* Lesson X.

§ 68. The roots कथ्, ख्या, शंस्, and चक्ष्, all meaning '*to tell*' (contrary to the principle of दुहयाच्पच् &c.) the causal of विद् with नि (contrary to § 44), and other roots having the same sense, govern the Dative of the person to whom something is told, as, आर्ये कथयामि ते भूतार्थं (S'. 1) 'O worthy lady, I tell you the truth'; एहि, इमां वनस्पतिसेवां काश्यपाय निवेदयावहः (S'. 4) 'come, let us communicate this service of the trees to Kàśyapa'; so यस्मै ब्रह्मपारायणं जगौ (U. 4) 'to whom he sang (revealed) the Veda'; यस्मै मुनिर्ब्रह्म परं विवव्रे (Mv. 2).

§ 69. Verbs meaning 'to send' or 'despatch' generally govern the Dative of the person, but Accusative of the place, to whom or which a thing is sent; as, भोजेन दूतो रघवे विसृष्टः (R. V. 39) 'a messenger was sent to Raghu by Bhoja'; माधवं पद्मावतीं प्रहिण्वता देवरातेन (Màl. 1.) 'by Devaràta sending Màdhava to Padmàvatî.'

§ 70. * The secondary or indirect object of the root मन् 'to think' cl. 4, which is not an animal, takes either the Accusative or Dative, when *contempt* is to be shown; as, न त्वां तृणाय तृणं वा मन्ये (S. K.) 'I do not consider thee to be worth a straw.'

---

* मन्यकर्मण्यनादरे विभाषाऽप्राणिषु। (II. 3. 17)

Obs. When no negation and contempt are meant, but mere *comparison*, the Accusative alone is used; as, त्वां तृणं मन्ये (Mbh.) 'I consider thee as a straw'; but हरिमप्यमंसत तृणाय (S'i. XV. 61).

§ 71. † In the case of roots implying *motion*, the place to which motion is directed is put in the Dative or Accusative case when physical motion is indicated; as, ग्रामं ग्रामाय वा गच्छति; but मनसा हरिं व्रजति 'goes to Hari mentally' (contemplates him).

Obs. (1) राधीक्ष्योर्यस्य विप्रश्नः (I. 4. 39) *i.e.*, the person, with regard to whom some questions as to good fortune or welfare are asked, is put in the Dative in the case of the roots राध् 'to propitiate' and ईक्ष् 'to look to the welfare of any one'; as, कृष्णाय राध्यति ईक्षते वा गर्गः (*i.e.*, पृष्टो गर्गः शुभाशुभं पर्यालोचयति) (2) परिक्रयणे संप्रदानमन्यतरस्यां (I. 4. 44) *i.e.*, the price at which a person is employed on stipulated wages is put in the instr. or dat. case; as, शतेन शताय वा परिक्रीतोऽयं दासः।

नैतन्न्याय्यम्। सर्वज्ञस्याप्येकाकिनो निर्णयाभ्युपगमो दोषाय। (M. 1)

चपलोऽयं बटुः कदाचिदस्मत्प्रार्थनामंतःपुरेभ्यः कथयेत्। (S'. 2)

अहमपि वैतानिकं शांत्युदकमस्यै गौतमीहस्ते विसर्जयिष्यामि। (S'. 3)

स्पृहयामि खलु दुर्ललितायास्मै। मृगतृष्णिकेव नाममात्रप्रस्तावो मे विषादाय कल्पते। (S'. 7)

मूर्ख नैष तव दोषः। साधोः शिक्षा गुणाय संपद्यते नासाधोः। (P. I. 18)

प्रसीद भगवति वसुंधरे शरीरमसि संसारस्य। तत्किमसंविदानेव जामात्रे कुप्यसि। (U. 7)

---

† गत्यर्थकर्मणि द्वितीयाचतुर्थ्यौ चेष्टायामनध्वनि (II. 3. 12)

मिथ्यामाहात्म्यगर्वनिर्भरा न प्रणमंति देवताभ्यो न मानयंति मान्यानात्मप्रज्ञापरिभव इत्यसूयंति सचिवोपदेशाय कुप्यंति हितवादिने।
(K. 108)

प्रतिश्रुतं तेन तस्मै स्वसुरवंतिसुंदर्याः प्रदानम्। (Dk. II. 1)

चंद्रापीडः तमुपसृत्य पूर्ववदेव तां महाश्वेताप्रणामपुरःसरं दर्शितविनयः प्रणनाम। (K. 219)

प्रणिपत्य सुरास्तस्मै शमयित्रे सुरद्विषाम्।
अथैनं तुष्टुवुः स्तुत्यमवाङ्मनसगोचरम्॥ (R. X. 15)

रविमावसते सतां क्रियायै सुधया तर्पयते सुरान् पितॄंश्च।
तमसां निशि मूर्च्छतां निहंत्रे हरचूडानिहितात्मने नमस्ते।(V. 3)

उमा वधूर्भवान् दाता याचितार इमे वयम्।
वरः शंभुरलं ह्येष त्वत्कुलोद्भूतये विधिः॥ (Ku. VI. 82)

चरतः किल दुश्चरं तपस्तृणबिंदोः परिशंकितः पुरा।
प्रजिघाय समाधिभेदिनीं हरिरस्मै हरिणीं सुरांगनाम् (R. VIII. 79)

वाताय कपिला विद्युदातपायातिलोहिनी।
पीता भवति सस्याय दुर्भिक्षाय सिता भवेत्॥ (Mbh.)

स्वस्त्यस्तु ते निर्गलितांबुगर्भं
शरद्घनं नार्दति चातकोऽपि। (R. V. 17)

ताभ्यां तथागतमुपेत्य तमेकपुत्र-
मज्ञानतः स्वचरितं नृपतिः शशंस। (R. IX. 77)

परित्राणाय साधूनां विनाशाय च दुष्कृताम्।
धर्मसंस्थापनार्थाय संभवामि युगे युगे॥ (Bg. IV. 8)

ADDITIONAL SENTENCES FOR EXERCISE

तदाकर्ण्य तामहं दंडवत्प्रणम्य तस्यै मद्वुदंतमखिलमाख्याय विस्मयविकसिताक्षं जनकमदर्शयम् । (Dk. I. 4)

सखि वासंति दुःखायेदानीं रामस्य दर्शनं सुहृदाम् । तत्कियच्चिरं त्वां रोदयिष्यामि । तदनुजानीहि मां गमनाय । (U. 3)

स्वयमेवोत्पद्यंत एवंविधाः कुलपांशवो निःस्नेहाः पशवो येषां क्षुद्राणां प्रज्ञा पराभिसंधानाय न ज्ञानाय पराक्रमः प्राणिनामुपघाताय नोपकाराय धनपरित्यागः कामाय न धर्माय किं बहुना सर्वमेव येषां दोषाय न गुणाय । (K. 288)

श्रोत्रियायाभ्यागताय वत्सतरीं महोक्षं वा निर्वपंति गृहमेधिनः (U. 4)

दुदोह गां स यज्ञाय सस्याय मघवा दिवम् ।
संपद्विनिमयेनोभौ दधतुर्भुवनद्वयम् ॥ (R. I. 26)

नमस्त्रिमूर्तये तुभ्यं प्राक्सृष्टेः केवलात्मने ।
गुणत्रयविभागाय पश्चाद्भेदमुपेयुषे ॥ (Ku. II. 4)

स स्थाणुः स्थिरभक्तियोगसुलभो निःश्रेयसायास्तु वः । (V. 1)

सर्वः कल्पे वयसि यतते लब्धुमर्थान्कुटुंबी
पश्चात्पुत्रैरपहृतभरः कल्पते विश्रमाय । (V. 3)

यदेवोपनतं दुःखात्सुखं तद्रसवत्तरम् ।
निर्वाणाय तरुच्छाया तप्तस्य हि विशेषतः (V. 3)

शुद्धांतसंभोगनितांततुष्टे न नैषधे कार्यमिदं निगाद्यम् ।
अपां हि तृप्ताय न वारिधारा स्वादुः सुगंधिः स्वदते तुषारा ॥ (N. III. 95)

किमित्यपास्याभरणानि यौवने धृतं त्वया वार्द्धकशोभि वल्कलम् ।
वद प्रदोषे स्फुटचंद्रतारका विभावरी यद्यरुणाय कल्पते ॥ (Ku. V. 44)

पुंसामसमर्थानामुपद्रवायात्मनो भवेत्कोपः ।
पिठरं क्वथदतिमात्रं निजपार्श्वानेव दहतितराम् ॥ (P. I. 14)

पयःपानं भुजंगानां केवलं विषवर्धनम् ॥
उपदेशो हि मूर्खाणां प्रकोपाय न शांतये ॥ (H. 3)

प्रतिवाचमदत्त केशवः शपमानाय न चेदिभूभुजे ।
अनुहुंकुरुते घनध्वनिं न हि गोमायुरुतानि केसरी ॥ (S'i. XVI. 25)
संतानकामाय तथेति कामं राज्ञे प्रतिश्रुत्य पयस्विनी सा ।
दुग्ध्वा पयः पत्रपुटे मदीयं पुत्रोपभुंक्ष्वेति तमादिदेश ॥ (R. II. 65)
तस्याः प्रसन्नेन्दुमुखः प्रसादं गुरुर्नृपाणां गुरवे निवेद्य ।
प्रहर्षचिह्नानुमितं प्रियायै शशंस वाचा पुनरुक्तयेव ॥ (R. II. 68)
ततो यथावद्विहिताध्वराय तस्मै स्मयावेशविवर्जिताय ।
वर्णाश्रमाणां गुरवे स वर्णी विचक्षणः प्रस्तुतमाचचक्षे ॥ (R. V. 19)
वसन् स तस्यां वसतौ रघूणां पुराणशोभामधिरोपितायाम् ।
न मैथिलेयः स्पृहयांबभूव भर्त्रे दिवो नाप्यलकेश्वराय ॥ (R.XVI.42)

तस्यै स्पृहयमाणोऽसौ बहुप्रियमभाषत ।
सानुनीतिश्च सीतायै नाक्रुध्यन्नाप्यसूयत ॥
संक्रुध्यसि मृषा किं त्वं दिदृक्षुं मां मृगेक्षणे ।
ईक्षितव्यं परस्त्रीभ्यः स्वधर्मो रक्षसामयम् ॥
रावणाय नमस्कुर्याः स्यात् सीते स्वस्ति ते ध्रुवम् ।
अन्यथा प्रातराशाय कुर्याम त्वामलं वयम् ॥ (Bk. VIII. 76-8,98)

Wretched man, do you like service in the house of a Chàndala ?

Lady, do not misunderstand me, and do not get angry with me in vain.

I do not long for (स्पृह्) wealth, but immortal glory.

Having promised Lakshma*n*a to accompany him, why do you now tell him that you are unable to do so ?

Being greatly delighted at hearing the account, they communicated (विद् with नि) to him even their very secrets.

Even a sight of these pious men will bring about (क्लृप्) my purification ; I shall, therefore, wait upon them for the accomplishment of my desired object.

I told him (ख्या with आ) through my brother that I had nothing to do with seeing him.

Old lady, such sad thoughts will only result in greater sorrow; therefore, compose yourself for a time.

The enjoyment of pleasures in this world only leads to disgust.

My subjects bear hatred towards (असूय्) me and plot against (द्रुह्) my life.

First salute (प्रणम्) your preceptor and then begin to learn your lesson.

A bow to three-eyed God, who reduced Cupid to ashes with the fire of his third eye!

When a man gets a son, he pays off the debt due to his fathers.

You yourself are able to defeat (*use* अलं) the whole troop of the enemy.

When a man is doomed by fate, even a trifling cause is sufficient (अलं) to bring about his ruin.

I shall send a messenger to the king of Videha, and communicate to him this glad tidings.

LESSON VIII

The Ablative Case

§ **72.** The chief sense of the Ablative case is अपादान. That from which separation, whether actual or conceived, takes place is called अपादान, and is put in the Ablative case; as, ग्रामादायाति 'he comes from a village'; *i.e.*, that from which the separation takes place is ग्राम. It has thus the sense of 'from' in English.

§ **73.** *A noun in the Ablative case frequently denotes

---

* विभाषागुणेऽस्त्रियाम्। (II. 3. 25)

the cause of an action or phenomenon, and has the sense of 'on account of', 'for', 'by reason of' &c.; as, सौहृदादपृथगाश्रयां (U. 1) 'not living apart (whose resort was not different) on account of affection.' A noun not of the feminine gender denoting the cause of an action is put in the Instrumental or Ablative; as, जाड्येन जाड्यात् वा बद्धः (S. K.) 'he was caught by reason of his dulness'; बुद्ध्या मुक्तः (S. K.) 'he was set at liberty on account of his skill'; भक्त्या गुरौ मय्यनुकंपया च प्रीतास्मि ते (R. II. 63) 'I am pleased with thee for thy devotion to (thy) preceptor and compassion on me.'

Obs. Sometimes a feminine noun also is used in the Ablative in this sense; as, नास्ति घटोनुपलब्धेः (S. K.).

(*a*) The Ablative often serves the purpose of a whole causative assertion in replying to, or advancing arguments in discussions; as, पर्वतो वह्निमान् धूमात् (Tarka.) 'the mountain has fire (in it), because there is smoke'; नेश्वरो जगतः कारणमुपपद्यते। कुतः वैषम्यनैर्घृण्यप्रसंगात् (S. B.) (A disputant says) 'God cannot be the efficient cause of the world. Why? (Because) he is liable to (the two charges of) being partial and cruel.'

§ 74. Words in the comparative degree, or such as have the sense of comparison, are used with the Ablative of that with reference to which the comparison is made; as, सत्यादप्यनृतं श्रेयः (Ve. 3) 'falsehood is better even than truth'; मोहादभूत्कष्टतरः प्रबोधः (R. XIV. 56) 'consciousness became more painful than swoon'; चैत्ररथादनूने वृंदावने (R. VI. 50) 'in Vrindavana not inferior to Chaitraratha'; अश्वमेधसहस्रेभ्यः सत्यमेवातिरिच्यते (H. 4) 'truth itself is superior to a thousand horse-sacrifices'; श्राद्धस्य पूर्वाह्णादपराह्णो विशिष्यते (Manu. III. 278) 'for a S'râddha ceremony afternoon is preferred to forenoon.'

§ 75. *When the sense of an absolutive is suppressed

---

*ल्यब्लोपे कर्मण्युपसंख्यानं। अधिकरणे च। प्रश्नख्यानयोश्च। (Vâr.)

in a sentence, the object of the absolutive is put in the Ablative case; as, प्रासादात्प्रेक्षते (S. K.) = प्रासादमारुह्य प्रेक्षते 'sees from a palace'; so श्वशुराज्जिह्रेति (S. K.) = श्वशुरं वीक्ष्य जिह्रेति.

(*a*) The place where an action is performed is also put in the Ablative under the same circumstances; as, आसनात्प्रेक्षते, *i.e.*, आसने उपविश्य प्रेक्षते 'sees from a seat.'

(*b*) In questions and answers also the Ablative is used; as, कुतो भवान्-पाटलिपुत्रात् (Mbh.).

§ 76. *Words denoting जुगुप्सा 'abhorrence,' विराम 'cessation,' 'refraining,' and प्रमाद 'swerving,' govern the Ablative case; as, पापाज्जुगुप्सते (Mbh.) 'he shrinks from sin'; वत्सैतस्माद्विरम (U. 1) 'desist from this, O child'; स्वाधिकारात्प्रमत्तः (Me. 1) 'swerving from his duty'; similarly प्राणाघातान्निवृत्तिः (Bh. II. 26) 'refraining from injury to life'; धर्मान्मुह्यति (Mbh.)

Obs. प्रमद् is usually construed with the Locative in the sense of 'to be careless about'; as, न प्रमाद्यंति प्रमदासु विपश्चितः (Manu. II. 213) 'wise men are not careless about their women.'

§ 77. † The teacher from whom something is learnt, the prime cause in the case of जन् 'to be born,' and the 'source' in the case of भू, are put in the Ablative case; as, उपाध्यायादधीते (S. K.) 'learns from the preceptor'; so मया तीर्थादभिनयविद्या शिक्षिता (M. 1) 'I learnt the art of dramatic representation from a teacher'; गोमयाद्वृश्चिको जायते (Mbh.) 'the scorpion is produced from cowdung'; प्राणाद्वायुरजायत (*Rig*veda X. 90) 'the wind was born from the breath'; हिमवतो गंगा प्रभवति (Mbh.) 'the Ganga has its source in the Himàlayas'; लोभात् क्रोधः प्रभवति (H. 1) 'anger proceeds from avarice.'

---

* जुगुप्साविरामप्रमादार्थानामुपसंख्यानम् (Vàr.)

† आख्यातोपयोगे । जनिकर्तुः प्रकृतिः । भुवः प्रभवः (I. 4. 29, 30-1)

Obs. Verbs meaning 'to be born' are often used with the Locative of the 'source'; as, परदारेषु जायेते द्वौ सुतौ कुंडगोलकौ (Manu. III. 174); जातोपि दास्यां शूद्रेण (Y. II. 133); शुकनासस्यापि मनोरमायां तनयो जातः (K. 73); सा तस्यामुदपादि (Ku. I.22.)

§ 78. ‡ In the case of words implying 'fear' and 'protection from danger', that from which the fear or danger proceeds is put in the Ablative case; as, न भीतो मरणादस्मि (Mk. 10) 'I am not afraid of death'; कपेरत्रासिषुर्नादात् (Bk. IX. 11) 'were afraid of the monkey's sound'; तीक्ष्णादुद्विजते (Mu. 3) 'is afraid of (shrinks away from) a severe person'; भीमाद्दुःशासनं त्रातुं (Ve. 3) 'to save Duhs'àsana from Bhîma'; so लोकापवादाद्भयं (Bh. II. 62), तृणबिंदोः परिशंकितः (R. VIII. 79).

(*a*) * That from which a person is warded off or prevented is also put in the Ablative; as, पापान्निवारयति (Bh. I. 72) 'wards off from sin.'

§ 79. † In the case of the root जि with परा, that which becomes unbearable is put in the Ablative case; as, अध्ययनात्पराजयते (Mbh.) 'finds study unbearable.'

§ 80. ¶ The point of time or space from which some 'distance in time or space' is measured, is put in the Ablative case. The word denoting the 'distance in space' is put either in the Nominative or Locative, and that denoting 'the distance in time', in the Locative; as, गवीधुमतः सांकाश्यं चत्वारि योजनानि चतुर्षु योजनेषु वा (Mbh.) 'S. is four yojanas from G.'; कार्तिक्या आग्रहायणी मासे (*ibid.*) 'A. is one

---

‡ भीत्रार्थानां भयहेतुः। (I. 4. 25)
* वारणार्थानामीप्सितः। (I. 4. 27.)
† पराजेरसोढः। (I. 4. 26)
¶ यतश्चाध्वकालनिर्माणं तत्र पंचमी तद्युक्तादध्वनः प्रथमासप्तम्यौ कालात् सप्तमी च वक्तव्या। (Vär.)

month (at the interval of the month) from K.'; so, समुद्रात्पुरी क्रोशौ or क्रोशयोः.

§ 81. ¶ Words meaning 'other than' or 'different from', such as अन्य, पर, इतर; आरात् 'near' or 'remote'; ऋते 'without'; words indicative of the 'directions' used also with reference to the 'time' corresponding to them; words expressive of 'directions' derived from अंच्, for instance प्राक्, प्रत्यक्, and such as end in आ and आहि; all these govern the Ablative case; as कृष्णादन्यो भिन्न इतरो वा (S. K.) 'different from, or other than, Krishna'; आराद्वनात् (S. K.) 'near the forest, or away from it'; विविक्तादृतेऽन्यच्छरणं नास्ति (V. 2) 'there is no resort other than a retired spot'; ग्रामात्पूर्वं उत्तरो वा 'to the east or north of the village'; चैत्रात्पूर्वः फाल्गुनः (S. K.) 'the month of Fâlguna is prior to (that of) Chaitra'; प्राक्प्रत्यग्वा ग्रामात् (*ibid.*) 'to the east or west of the village'; दक्षिणा दक्षिणाहि वा ग्रामात् (*ibid.*) 'to the south, or in the southern direction, of the village'; प्राङ्नाभिवर्धनात् (Manu II.29) 'before the naval is cut.'

§ 82. The words प्रभृति, आरभ्य, वहिः, अनंतरं, परं, ऊर्ध्वं govern this case; as, शैशवात्प्रभृति पोषितां (U. 1) 'brought up ever since her childhood'; मालत्याः प्रथमावलोकदिवसादारभ्य (Mâl. 6) 'from the day of first seeing Mâlatî'; निवसन्नावसथे पुराद्बहिः (R. VIII. 14) 'residing in a dwelling out of the town'; पाणिपीडनविधेरनंतरं (Ku. VIII. 1) after the espousing of her hand'; अस्मात्परं (S'. 6) 'after this person'; ऊर्ध्वं म्रियै मुहूर्ताद्धि (Bk. XVIII. 36) 'I shall die after a moment.'

Obs. (*a*) The words प्रभृति and आरभ्य are often found used with adverbs of time in the same sense; as, यतः प्रभृति —ततः प्रभृति (S'. 3); अद्यप्रभृति तवास्मि दासः (Ku. V. 86).

(*b*) The sense of अनंतरं, परं &c. is sometimes understood; as, बहोर्दृष्टं कालात् (U. 2) 'seen after a long time.'

§ 83. *The words पृथक् 'different,' विना and नाना govern,

¶ अन्यारादितरर्तेदिक्शब्दाञ्चूत्तरपदाजाहियुक्ते । (II. 3. 29)
*पृथग्विनानाभिस्तृतीयाऽन्यतरस्याम् । (II. 3. 32)

besides this case, the Accusative and Instrumental cases; as, रामाद्रामेण रामं वा विना पृथग् नाना वा (S. K.) 'without or different from Ràma,' नाना नारीं निष्फला लोकयात्रा (Vopadeva).

§ 84. The preposition आ in the sense of '*till*,' '*as far as*,' and '*from*' governs the Ablative case; as, आपरितोषाद्विदुषां (S'. 1) 'till the satisfaction of the learned'; आमूलाच्छ्रोतु-मिच्छामि (S'. 1) 'I wish to hear from the beginning'; आकैलासात् (Me. 11) 'as far as the Kailàsa.' Sometimes आ is joined to nouns to form Avyayibhàva compounds; as, आमेखलं संचरतां घनानां (Ku. I. 5) 'of clouds sweeping as far as the girdle (middle part).'

§85. *When 'concealment' is indicated, the person whose sight one wishes to avoid is put in the Ablative case; as, मातुर्निलीयते कृष्णः (S. K.) 'K*r*ish*n*a hides himself from his mother.'

§86. †The preposition प्रति in the sense of 'representa-tive of' or 'in exchange for,' governs the Ablative; as, प्रद्युम्नः कृष्णात्प्रति (S. K.) 'P. is the representative of K.'; तिलेभ्यः प्रतियच्छति माषान् (S. K.) 'exchanges Màshas for sesamum.'

अनुष्ठितनिदेशोपि सत्क्रियाविशेषादनुपयुक्तमिवात्मानं समर्थये। (S'. 7)

अलमलमाक्रंदितेन। सूर्योपस्थानात्प्रतिनिवृत्तं पुरूरवसं मामुपेत्य कथ्यतां कुतो भवत्याः परित्रातव्या इति । (V. 1)

रामः—एवमेतत्। एते हि हृदयमर्मभिदः संसारभावा येभ्यो बीभ-त्समानाः संत्यज्य सर्वान् कामान्मनीषिणोऽरण्ये विश्राम्यन्ति। (U. 1)

नास्ति जीवितादन्यदभिमततरमिह जगति सर्वजंतूनाम्। (K. 35)

---

*अंतर्धौ येनादर्शनमिच्छति। (I. 4. 28)

†प्रतिनिधिप्रतिदाने च यस्मात्। (II. 3. 11.)

नैव जानासि तं देवमैक्ष्वाकं यदेवं वदसि। तद्विरम्यतामतिप्रसंगात्।
(U. 5)

कृतातिथ्यया महाश्वेतया परिपृष्टो दिग्विजयादारभ्य किन्नरमिथुनानुसरणप्रसंगेनागमनमात्मनः सर्वमाचचक्षे। (K. 134)

वत्से मालति जन्मनः प्रभृति वल्लभा ते लवंगिका। तत्किमुज्जिहानजीवितां वराकीं नानुकंपसे। (Mal. 10)

चाणक्यः—वृषल वृषल अलमुत्तरोत्तरेण। यद्यस्मत्तो वरीयान् राक्षसोऽवगम्यते तदिदं शस्त्रं तस्मै दीयताम्। (Mu. 3)

तासां चतुर्दश कुलानि। एकं भगवतः कमलयोनेर्मनसः समुत्पन्नम्। अन्यद्वेदेभ्यः संभूतम्। अन्यदग्नेरुद्भूतम्। अन्यत् पवनात्प्रसूतम्। अन्यदमृतादुन्मथ्यमानादुत्थितम्। अन्यज्जलाज्जातम्। अन्यदर्ककिरणेभ्यो निर्गतम्। अन्यत्सौदामिनीतः प्रवृत्तम्। (K. 136)

मां तावदुद्धर शुचो दयिताप्रवृत्त्या
स्वार्थात्सतां गुरुतरा प्रणयिक्रियैव। (V. 4.)

निशम्य चैनां तपसे कृतोद्यमां सुतां गिरीशप्रतिसक्तमानसाम्।
उवाच मेना परिरभ्य वक्षसा निवारयंति महतो मुनिव्रतात्। (Ku. V. 3)

प्रजां संरक्षति नृपः सा वर्धयति पार्थिवम्।
वर्धनाद्रक्षणं श्रेयस्तदभावे सदप्यसत् (H. 3)

त्वचं स मेध्यां परिधाय रौरवी—
मशिक्षतास्त्रं पितुरेव मंत्रवत्। (R. III. 31)

अनम्राणां समुद्धर्तुस्तस्मात्सिंधुरयादिव।
आत्मा संरक्षितः सुह्मैर्वृत्तिमाश्रित्य वैतसीम्॥ (R. IV. 35)

ध्यायतो विषयान्पुंसः संगस्तेषूपजायते।
संगात्संजायते कामः कामात्क्रोधोऽभिजायते॥

क्रोधाद्भवति संमोहः संमोहात्स्मृतिविभ्रमः ।
स्मृतिभ्रंशाद्बुद्धिनाशो बुद्धिनाशात्प्रणश्यति ॥ (Bg. II. 62–3)
हिमवद्विंध्ययोर्मध्यं यत्प्राग्विनशनादपि ।
प्रत्यगेव प्रयागाच्च मध्यदेशः प्रकीर्तितः ॥ (Manu II. 12)

ADDITIONAL SENTENCES FOR EXERCISE

जन्मकर्मतो मलिनतरजनं जनतो निस्त्रिंशतरलोकहृदयं लोकहृदयेभ्यो निर्घृणतरसर्वसं व्यवहारमपुण्यकर्मैकापणं पक्कणमपश्यम् । (K. 356)

सा कुसुमघटितशिलीमुखमनोहरान्मदनचापादिव प्रमदवनात्त्रस्यति जानकीव पीतरक्तेभ्यो रजनिचरेभ्य इव चंपकाशोकेभ्यो बिभेति। (K. 225)

तं नृपं वसुरक्षितो नाम मंत्रिवृद्ध एकदाऽभाषत । तात अत्रभवति सर्वैवात्मसंपदभिजनात्प्रभृत्यन्यूनैव लक्ष्यते । बुद्धिश्च निसर्गपट्वी तवेतरेभ्यः प्रतिविशिष्यते । (Dk. II. 8)

अहो दुराराध्या राजलक्ष्मीरात्मविद्भिरपि राजभिः—
तीक्ष्णादुद्विजते मृदौ परिभवत्रासान्न संतिष्ठते
मूर्खान्द्वेष्टि न गच्छति प्रणयितामत्यंतविद्वत्स्वपि ।
शूरेभ्योऽप्यधिकं बिभेत्युपहसत्येकांतभीरूनहो
श्रीर्लब्धप्रसरेव वेशवनिता दुःखोपचर्या भृशम् । (Mu. 3)

सर्वद्रव्येषु विद्यैव द्रव्यमाहुरनुत्तमम् ।
अहार्यत्वादनर्घत्वादक्षयत्वाच्च सर्वदा ॥ (H. 1)

प्रजानां विनयाधानाद्रक्षणाद्भरणादपि ।
स पिता पितरस्तासां केवलं जन्महेतवः ॥ (R. I. 24)

न नवः प्रभुराफलोदयात्स्थिरकर्मा विरराम कर्मणः ।
न च योगविधेर्नवेतरः स्थिरधीरापरमात्मदर्शनात् ॥
(R. VIII. 22)

रत्नैर्महार्हैस्तुतुषुर्न देवा न भेजिरे भीमविषेण भीतिम् ।
सुधां विना न प्रययुर्विरामं न निश्चितार्थाद्विरमंति धीराः ॥
(Bh. II. 80)

श्रेयान्स्वधर्मो विगुणः परधर्मात्स्वनुष्ठितात् ।
स्वधर्मे निधनं श्रेयः परधर्मो भयावहः ॥ (Bg. III. 35)
लोभान्मोहाद्भयान्मैत्र्यात् कामात्क्रोधात्तथैव च ।
अज्ञानाद्बालभावाच्च साक्ष्यं वितथमुच्यते ॥ (Manu VIII. 118)
वृक्षाद्वृक्षं परिक्रामन्रावणाद्बिभ्यतीं भृशम् ।
शत्रोस्त्राणमपश्यंतीमदृश्यो जनकात्मजाम् ॥
तां पराजयमानां स प्रीते रक्ष्यां दशाननात् ।
अंतर्दधानां रक्षोभ्यो मलिनां ध्याममूर्धजाम् ॥ (अपश्यत्)
(Bk. VIII. 70–1)

पूर्वस्मादन्यवद्भाति भावाद्दाशरथिं स्तुवन् ।
ऋते क्रौर्यात्समायातो मां विश्वासयितुं नु किम् ॥
इतरो रावणादेष राघवानुचरो यदि ।
सफलानि निमित्तानि प्राक् प्रभातात्ततो मम ॥ (Bk. VIII. 105-6)
एतद्वोऽयं भृगुः शास्त्रं श्रावयिष्यत्यशेषतः ।
एतद्धि मत्तोऽधिजगे सर्वमेषोऽखिलं मुनिः ॥ (Manu I. 59)
एकाक्षरं परं ब्रह्म प्राणायामाः परं तपः ।
सावित्र्यास्तु परं नास्ति मौनात्सत्यं विशिष्यते ॥ (Manu II. 83)

A house without a house-wife surpasses a forest in dreariness.

Go in the northern direction (उत्तरं) of this tree, and I shall just follow you.

Do not desist from the work you have once promised to perform.

I have walked to this place from the hermitage of Vàlmiki to learn the Vedas from these ascetics.

He exposed himself to much trouble in saving that girl from danger.

He who wards off his friend's mind from sin and makes him set it on virtue, is called a real friend.

Do you not know that various kinds of miseries result from treading in the foot-steps of the wicked?

This your illness arose (जन्) from your great exertions of yesterday. Is there now any change for the better?

Who else but this powerful king can protect his realm as far as (आ) the regions of the Himàlayas?

Before (प्राक्) beginning his studies he places his grammar and dictionary by him.

Five years ago I saw this very charming forest; but now it has undergone a vast change.

Ever since the day on which I happened to see her, my mind has become perturbed, and I do not think even of taking my food, on account of my constantly thinking of her.

I do not approve of the speech you made yesterday after (ऊर्ध्वं or अनंतरं) the excellent oration of the President.

Sità was dearer to Ràma (*gen.*) than his very life.

अस्मिन्विषये सर्वेषां तेषामैकमत्यम् 'they all *agree* (there is a unanimity) on this point.'

शरसन्धानं कुर्वन् 'taking *aim* with his arrow.' क्वानिर्दिष्ट-कारणं गम्यते 'where are you going without any definite *aim*.'

वातमासेव् 'to take the *air*,' प्रकाशतां गम् 'take *air*' अवलेप-मुद्रा 'an *air* of conceit,' निकृतमिवात्मानं संदर्श्य 'with the *air* of one who is offended.' गगनकुसुमानि-खपुष्पाणि-चि, मनोराज्य-विजृंभणं कृ 'to build castles in the *air*.'

अकस्मात्, सहसा, एकपदे '*all* of a sudden.' एतावान्मे विभवो भवन्तं सेवितुं 'this is *all* I can do to serve you.' जीवितसर्वस्वं '*all*-in-*all* of one's life.' एवं पिण्डीकृत्य मह्यं विंशतिं रूपकान्देहि "give me 20 rupees in *all*.' सर्वे मिलित्वा सप्त वयं 'we are 7 in *all*.'

इयं कथा मामेव लक्षीकरोति 'this story *alludes* to myself.'

क्षीणभूयिष्ठायां क्षपायां 'when the night had *almost* worn away." अधुना प्रभातप्राया-कल्पा रजनी 'it is *almost* dawn now.' मृतप्रायकल्प '*almost* dead (all but dead)'.

अन्या गतिर्नास्ति, अन्यच्छरणं नालोक्यते 'there is no *alternative* (course, help).'

एष तव वचसो निष्कर्षः—पिण्डितोर्थः 'your whole speech *amounts*

to this (this is the purport or sum and substance of your speech).'

अराजके जनपदे 'when the country is in a state of *anarchy*.'

जन्मदिवस: '*anniversary* of birth.' मृततिथि: '*anniversary of death*.'

भवतु-त्तथा-इति स प्रत्युवाच 'he *answered* very well', इदं मे इष्टसिद्धये कल्पेत 'this will *answer* my purpose,' will do for me.

चिन्ताविषघ्नोऽगद: 'an *antidote* against anxiety.' विषवैद्य:, जांगुलिक: 'a dealer in *antidotes*.'

व्याजस्तुति: '*apparent* praise.'

अस्मिन्नर्थेऽत्रभवन्तं प्रमाणीकरोमि, अत्र भवान् प्रमाणं 'I *appeal* to your honour in this case.'

साक्षी नोपतस्थौ 'the witness did not *appear*.' शोभनाकृति, सुभगाकृति, चारुदर्शन, प्रेक्षणीय 'good in *appearance*.' तव कथा सत्येव प्रतिभाति-अवभासते 'your story has an *appearance* of truth.'

सुखार्थे विषयशब्दं न प्रयुंजते 'they do not *apply* the word विषय to happiness.' द्वितीयगामी न हि शब्द एष न: 'this our title does not *apply* to any one else.' कोऽपरो नियोगोनुष्ठीयतामिति प्रार्थयामास 'he *applied* for further orders.' वयं स्वकर्मण्यभियुज्यामहे 'we *apply* ourselves to our work.'

संकेतं-समयं अनुरुध्यस्व-अनुपालय 'keep your *appointment* or engagement.' देवि सामयिका भवाम: 'Queen, let us keep (to) our *appointment* or engagement,' let us be punctual.

तीक्ष्णमति 'of quick *apprehension*.' मंदधी, स्थूलबुद्धि 'of dull *apprehension*,' 'dull-headed.'

प्रस्तावसदृशं, प्राप्तकालं, कालोचितं, समयानुरूपं '*appropriate* to (fit for) the occasion.'

न ते वचोऽभिनन्दामि 'I do not *approve* of your speech.' (your speech does not commend itself to me).

युवानो विस्मरणशीला: 'youths are *apt* to forget.' अतिस्नेह: पापशंकी 'over-affection is *apt* to suspect evil.'

ATT

लोके गुरुत्वं विपरीततां वा स्वचेष्टितान्येव नरं नयन्ति 'man is the *architect* of his own fortune' (the fortunate circumstances of our lives are of our own making).

वध्नाति मे चक्षुश्चित्रकूट: 'the Chitrakûta mountain *arrests* my eye.'

अव्याजमनोहरं-अकृत्रिमलावण्यं-निसर्गरमणीयं वपुः 'an *artlessly* (naturally) lovely body.'

गुणास्तावत्तस्य नैव विद्यन्ते '*as* for merits, he has none.' शीघ्रमिति सुकरं '*as* for doing it quickly, it is easy.' पितेति मां स मानयति '*as* a father he respects me.'

वेलोपलक्षणार्थं 'to *ascertain* the time.'

कस्मिन् दोषं निक्षिपामि, कं दोषपक्षे स्थापयामि 'to whom shall I *ascribe* the blame' (on whom shall I lay the blame). पापकर्म तस्य संभाव्यते 'a sinful deed is *ascribed* to him.'

भस्मी-भस्मसात् कृ 'to reduce to *ashes*.' भस्मीभू 'to be reduced to *ashes*.'

तस्य वदनं हर्षोत्फुल्लं बभौ 'he had a cheerful *aspect*.' सर्वं विपर्यासं यातं 'all things wore a different *aspect*.' उदगभिमुखं मे गृहं 'my house has a northerly *aspect*.'

कवियशः प्रार्थी '*aspiring* to the fame of a poet.' दूरारूढाः-दूराधिरोहिणः-उत्सर्पिणः खलु एते मनोरथाः 'these are, indeed, high *aspirations*' (ambitions, soaring desires).

मृगा मृगैः संगमनुव्रजन्ति 'deer *associate* with deer.'

कृतकं-मिथ्या-मौनं '*assumed* silence.'

इति मे निश्चयः, दृढं मन्ये 'I *assuredly* feel', 'I feel *assured*.'

उपचारातिक्रमं-प्रणितपातलंघनं-प्रमार्ष्टुमयमारंभः 'this is an act to *atone* (make amends) for the slighting of prostration.'

लोकापवादो बलवान्मतो मे 'I *attach* great importance to public censure.' नृपे सुदृढमनुरक्ताः प्रजाः 'subjects are firmly *attached* to the king.'

युवतयो गृहिणीपदं यान्ति 'young women *attain* to the position of house-wives.'

BEN

उदार-आर्य-नेपथ्यभृत् 'richly or splendidly *attired.*'

वैरभाव:, विपक्षवृत्ति: 'hostile *attitude.*'

आत्मन्यारोपितालीकाभिमाना: '*attributing* to themselves false greatness.'

राजदर्शनं लेभे 'I had an *audience* of (interview with) the king' दर्शनानुग्रहमिच्छामि 'I wish to be favoured with an *audience.*'

विपदुत्पत्तिमतामुपस्थिता, जातस्य हि ध्रुवो मृत्यु: 'destruction (death) *awaits* those that are born.'

चकितं नृपस्य पार्श्वमुपैमि 'I approach the king with *awe*.'

B

परोक्षे-क्षं 'behind one's *back*' (in one's absence). उर्वशी प्रत्यादेश: श्रिय: 'Urvas'î throws Lakshmî into the *back-ground*' (obscures, eclipses her).

सकलवचनानामविषयं-वर्णनविषयातिक्रान्तं-मोघवर्णनप्रयत्नं-तत्स्थानं 'the place *baffles* description.'

ते कुलस्याधय: 'they are a *bane* to the family.'

इति समय: कृत: 'such a *bargain* was struck.' अपि च, अपरं च 'into the *bargain.*'

तस्मिन्नवसरे तेन धीरं विक्रान्तं 'he *bore* himself bravely on that occasion.' चित्ते अवधृ, मनसि कृ, अनुस्मृ '*bear* in mind.' शोकवशं मा गम: '*bear up* under grief.'

सीतादेव्या: किं वृत्तं 'what *became* of the queen Sîtà?' what was Sità's fate?

आपतन्ति हि संसारपथमवतीर्णानामेते वृत्तान्ता: 'such incidents *befall* worldly persons.'

अश्रुतपूर्वं 'not heard *before.*'

लतान्तरित-लताव्यवहित विग्रह: 'concealing or hiding his body *behind* creepers.'

भ्रूभंगं कृ 'to *bend* the brow.' स पुनरपि स्वकार्ये मनो बबन्ध-न्यवेशयत् 'he *bent* his mind again to his task.' भवन्ति नम्रास्तरव: फलागमै: 'trees *bend* down under the load of fruits.' कृतनिश्चय,

BY

दृढनिश्चय, कृतसंकल्प, विहितप्रतिज्ञ '*bent on.*' परस्परवधोद्यतौ '*bent* on (killing) each other.'

आनन्दपरवशः, आनन्देन विगतचेतन इव भूत्वा '*beside* oneself with joy.' अप्रास्ताविकं, अप्रस्तुतं, अप्रासंगिकं, अप्रकृतं एतत् 'this is *beside* the question, irrelevant, does not bear on the matter in question.'

अस्ति मे विशेषोऽद्य 'I am (feel) *better* to-day.' अभिभू-अति रिच् *pass.* 'to get the *better* of.'

दुर्गम, दुर्ज्ञेय, दुर्बोध '*beyond* comprehension.' आयाधिकं व्ययं करोति 'he lives *beyond* his means.' स श्रुतिपथं अतिक्रान्तः-व्यतीतः 'he went *beyond* hearing.' गर्भेश्वरः 'rich from his *birth.*'

न मनागपि न स्तोकांशेनापि 'not a *bit*, not in the least.'

मृत्पिडबुद्धिः 'a *block-head*, clod-pated.'

समेत, संहत 'in a *body.*' आसन्नपरिचारकः 'a *body*-guard.'

भिन्नोष्टधा विप्रससार वंशः 'the family *branched* off into 8 parts.'

साहसे श्रीः प्रतिवसति 'fortune favours the *brave.*'

प्रभाता रजनी 'the day *broke*, it was day-break (dawn).' विच्छेदमाप कथाप्रबन्धः 'the story has suffered a *break.*' सभ्याः स्वं स्वं स्थानं प्रतिजग्मुः 'the assembly *broke* up.' तस्याक्ष्णोः प्रभातमासीत् 'the day *broke* upon his eyes.'

किं बहुना 'to be *brief*, in short.'

हर्षरोमांचित-पुलकित-कन्टकित-तनुः 'his body *bristling* or thrilling with joy.'

तस्याः सहसा प्रावर्तताश्रुधारा 'she *burst* into tears.' संभूय प्रशंसागिर उदतिष्ठन् 'there was a *burst* of applause.'

अप्रस्तुतं किमिति अनुसन्धीयते 'why do you beat about the *bush*?' ध्रुवाणि परित्यज्य अध्रुवनिषेवणं नेष्टं, अध्रुवाद् ध्रुवं वरं; वरमद्य कपोतो न श्वो मयूरः or वरं तत्कालोपनता तित्तिरी न पुनर्दिवसांतरिता मयूरी 'a bird in the hand is worth two in the *bush.*'

अनुदिवसं-दिनं, दिने दिने 'day *by* day.' शतशः '*by* hundreds.' एकैकशः आनुपूर्व्येण 'one *by* one.'

C

COM

प्रयत्नसंवर्धितः 'brought up with *care.*' निपुणमन्विष्य 'searching with *care.*' अधुनाहं वीतचिन्तः 'I do not *care* now.' न कामवृत्तिर्वचनीयमीक्षते 'a self-willed person *cares* not for blame.' प्रतिपात्रमाधीयतां यत्नः 'let *care* be taken of each character.'

प्रस्तुतविषये, प्रकृते 'in the *case* before us, in the present *case.*' तेन हि 'if such be the *case,*' well then.

किं मिष्टमिन्नं खरसूकराणां 'why *cast* pearls before swine.'

ज्वलनमुपगतं-अग्निदीप्तं-गेहं 'the house *caught* fire.' कर्मगृहीत, रूपाभिग्राहित, लोप्त्रेण गृहीत '*caught* in the act (red-handed).'

किन्नरमिथुनं यदृच्छयाद्राक्षीत् '*chanced* to see two Kinnaras.' घुणाक्षरन्यायेन 'by a happy *chance.*' स मया समापत्तिदृष्टः 'I *chanced* to see him, I accidentally met him.'

स्वभावो दुरतिक्रमः 'nature can't be *changed.*' क्षीरं दधिभावेन परिणमते, दधिभावमापद्यते 'milk is *changed* into curds.'

हस्ते निक्षिप् or समर्पय् 'give in *charge* of.' अयं जनः कस्य हस्ते समर्पितः-निक्षिप्तः 'in whose *charge* has this person been given.'

समाश्वसिहि, धैर्यं निधेहि हृदये 'be of good *cheer*, or *cheer* up, take courage.'

इत्थं or एवं गते-सति 'under these *circumstances,*' 'such being the case.' दुर्गत, दुर्दशापन्न, दुःस्थित 'in bad *circumstances.*' येन केनापि प्रकारेण 'under any *circumstances.*' 'any how.' यथावसरं, यथाकालं 'according to *circumstances.*'

अतिभूमिं गतो रणरणकोऽस्याः 'her anxiety has reached its *climax*', or the highest pitch.

निमिमील नरोत्तमप्रिया 'the king's beloved *closed* her eyes in death.' अद्य निर्वातं नभः 'it is *close* to-day.'

मृत्युमुखान्मुक्तः 'rescued from the *clutches* (jaws) of death.

यद्भावि तद्भवतु '*come* what may.' यद्भावि तद्भवतु शुभमशुभं वा '*come* harm, *come* good.' प्रकृतिमापद्, संज्ञां-चेतनां-लभ् or प्रतिपद्, प्रकृतौ स्था '*come* to oneself, regain consciousness, *comes to* one's sense.' आगामिनि सोमवासरे 'on the *coming* Monday.'

CON

तां सुखशयितं पृच्छ 'ask her whether she has had a *comfortable* sleep.' रात्रावपि निकामं शयितव्यं नास्ति 'I can't sleep *comfortably* even at night.'

दीर्घिकावलोकनगवाक्षगता 'sitting at a window *commanding* (the view of) a well.' आकृतिविशेषेष्वादरः पदं करोति 'good forms *command* respect.' पदं हि सर्वत्र गुणैर्निधीयते 'merits *command* notice or attention.' तनुवाग्विभवोपि सन् 'though I have no *command* of language' (though possessed of scanty powers of speech or description). तं वाग्वश्येवानुवर्तते 'he has *command* of language.'

इदं वृत्तं लेख्यं-पत्रं आरोपय, पत्रे निवेशय '*commit* this matter to writing.'

अस्माभिः सहैककार्याणां 'who have made *common* cause with us.'

सहाध्यायिन् 'a *companion* at school' 'a fellow-student.

समदुःखसुखः 'a *companion* in joy and sorrow.'

अहमहमिकया प्रणामलालसाः '*competing* with one another to salute first.'

अभिनंद्य ब्रवीति 'says or writes after presenting *compliments*.' च्यवनाय मां प्रणिपातय or मदीयो नमस्कारो वाच्यः 'give my *compliments* to Chyavana..' उपचारपदं '*complimentary* saying.'

स नाद्यापि पर्यवस्थापयति-संस्तंभयति आत्मानं 'he does not yet *compose* (collect) himself.'

महदपि राज्यं न मे सौख्यमावहति 'even my large kingdom does not *conduce* to my happiness.'

अपि रक्ष्यते त्वया रहस्यनिक्षेपः 'have you kept the secret *confided* to you.' विश्वास-विश्रंभ-भूमिः स मम 'he is my *confidant*.' विश्रंभ-स्थाने मन् 'to take into *confidence*.'

प्रसवकालः, प्रसवावस्था '*confinement* of a woman.' प्रसूता or प्राप्तप्रसवा तद्भार्या 'his wife is *confined* (is in child-bed).

दिष्ट्या सुतमुखदर्शनेन आयुष्मान्वर्धते 'you are to be *congratulated* upon seeing your son's face,' or 'I *congratulate* you upon seeing &c.'

CRE

प्रसन्नः-उपपन्नः-ते तर्कः 'your *conjuncture* is clear (you have rightly *conjunctured* or guessed).'

अग्निसात्कुरु, ज्वलनाय समर्पय '*consign* to the flames.'

तस्याचरणं वचसा न विसंवदन्ति 'his conduct is not *inconsistent* with his words.' स्वार्थाविरोधेन '*consistently* with their own interest.' अभिरूपभूयिष्ठा परिषद् 'an assembly mostly *consisting* of learned men.'

तस्य वचसि दुराशयं मा कल्पय-आरोपय 'do not put a bad *construction* upon his words.'

तत्परतयैव वेदान्तवाक्यानि योजयन्ति '*construe* Vedàntic sentences as referring to it.'

जनहितमपि तावत् त्वया चिन्तनीयं-मनसि कार्यमेव-अवेक्षणीयं 'you must also *consult* public good.' स्वहितपरायणो मा भूः 'do not *consult* (be intent on) your good alone.' सांवत्सरिकैः संवाद्यताम् 'let astrologers be *consulted.*'

गुरुः प्रहर्षः प्रबभूव नात्मनि, वपुषि न ममौ 'he could not *contain* his great joy.'

तेन ह्यस्य गृहीतार्था भवामि 'if so, I shall know its *contents.*'

यथावकाशं, कार्यांतरान्तरायमन्तरेण 'when it suits one's *convenience.*' अन्यकार्यातिपातमन्तरेण-कार्यान्तराविरोधेन-भवान् कदा मया द्रष्टव्यः 'when may I *conveniently* see you.'

अनभ्यन्तरा वयं मदनगतस्य वृत्तान्तस्य 'we are not *conversant* with love-matters.'

प्राणव्ययेनापि 'even at the *cost* of one's life.'

त्वद्वचनप्रत्ययात् '*counting* upon your promise.'

आ-समा-श्वस 'to take *courage.*' धैर्यं आस्था धैर्यं अवलंब् or अवष्टंभ्, धैर्यविष्टंभं कृ 'to summon *courage.*'

कथाप्रसंगेन, कथायोगेन, 'in the *course* of conversation.' कालक्रमेण, गच्छता कालेन, दिनेषु गच्छत्सु, गच्छति काले 'in *course* of time.' गत्यन्तराभावात्, अनन्यगतिकत्वात् 'there being no other *course.*'

स त्वत्तो लब्धोदयः 'he is your *creature*' (owes his rise to you).

DEL

एते संकल्पा मम प्रादुरासन् or आसीत्-समभूत् मे मनसि 'these thoughts *crossed* my mind (occurred to me).' मम दर्शनपथमागतः, नयनविषयमवतीर्णः 'he *crossed* my sight.' व्यत्यस्तभुजः 'with the arms *crossed*.' व्यत्यस्तपादः '*cross*-legged.'

सर्वऽस्य प्रयत्नाः सफलतां ययुः-फलिताः 'all his efforts were *crowned* with success.'

आचारपुष्पग्रहणार्थं 'to take flowers as is *customary*.' आचारं प्रतिपद्यस्व 'make the *customary* bow (salutation).'

मर्मच्छिद्-भिद्, मर्माणि कृन्तत् '*cutting* to the quick.' मद्वचनमाक्षिप्य '*cutting* short my speech.'

D

तस्योत्साहभंगं मा कृथाः 'do not *damp* his energy.'

आतुरो जीवितसंशये वर्तते 'the patient is in a *dangerous* state.'

अन्धं तमः, सूचिभेद्यं तमः 'pitchy (blinding) *darkness*.' सन्तमसं 'all pervading *darkness*.'

हाहानिनादेन दिशो बधिरयन्तः '*deafening* all directions with cries of *alas*.'

स्वासुभिर्भर्तुरानृण्यं गतः 'he paid off the *debt* of his master with his life.'

पश्चिमे वयसि, परिणतवयसि 'in the *decline* of life', 'in *declining* years.'

दूरगतमन्मथा सा, अतिभूमिं गतोस्या अनुरागः 'she is *deep* in love, far gone in love.'

मम विकारः परिच्छेदातीतः 'my anguish transcends *definition*.'

एकस्य मूल्येन व्ययः शुध्यति, सर्वा व्ययशुद्धिः संपद्यते 'all expenses are *defrayed* out of the proceeds of one.'

वैद्ययत्नपरिभावी गदः 'a disease which *defies* medical efforts.'

दीर्घसूत्री विनश्यति '*delay* is dangerous.'

वसुधां तस्य हस्तगामिनीमकरोत् '*delivered* the earth to him.' लेखं तस्य हस्तं प्रापयिष्यामि 'I shall *deliver* the letter into his hand.'

DIS

सर्वं दैवाधीनं-आयत्तं 'everything *depends* on fate.' मया प्रायोपवेशनं कृतं विद्धि '*depend* upon it, I shall starve myself to death.' असंशयं, नियतं, नूनं, खलु '*depend* upon it,' 'to be sure.' निमित्तसव्यपेक्ष '*dependent* on a cause.'

विषण्ण, मुक्तावयव '*depressed* in spirits,' 'dejected.'

सर्वजनस्योपहास्यतामुपयान्ति 'are *derided* by all,' 'become the laughing-stock of all.'

तस्याः श्रीर्वचनानामविषया 'her beauty can't be *described.*'

सविस्तरं, सविस्तरेण, विस्तरतः-शः, सुविस्तरं 'in *detail,*' at length, exhaustively.

सा पुपोष लावण्यमयान् विशेषान् or मनोहरं वपुः, प्रचीयमानावयवा 'she *developed* her lovely limbs.'

क्षुण्णाद्वर्त्मनो रेखामात्रमपि न व्यतीयुः 'did not *deviate* even a line (an inch) from the beaten path.'

नाहमात्मविनाशाय वेतालोत्थापनं करिष्यामि 'I shall not raise a *devil* for my own destruction.'

पुत्रसंक्रान्तलक्ष्मीकाः, गुणवत्सुतरोपितश्रियः 'having *devolved* their property upon their sons.'

लुप्तार्थं वचनं 'a *dead* letter.' अशाम्यं वैरं '*deadly* enmity.' स लोष्टघातं हतः 'he was pelted to *death.*'

अव्यतिरिक्तेयमस्मच्छरीरात् 'she is not *different* from my body (myself).'

विषमपदविमर्शिनी टीका 'a commentary explaining *difficulties.*'

आत्मन्यप्रत्ययं चेतः 'the mind feels *diffident* of itself.'

अलमप्रासंगिकेन or अप्रसंगेन, प्रकृतमेवानुसन्धीयतां 'enough of *digression.*'

चक्षुर्विषयातिक्रान्तेषु-नयनपथातीतेषु-अन्तरितेषु-अदृष्टिगोचरेषु-अन्तर्हितेषु-कपोतेषु 'the pigeons having *disappeared.*'

कर्तव्यानि दुःखितैर्दुःखनिर्वापणानि 'the afflicted should *disburden* (ease) their grief.'

शिष्य उपदेशं मलिनयति 'a pupil spoils, brings *discredit* on, the instruction (given to him).'

DRA

प्रकृतं-प्रस्तुतं अनुसृ or अनुसन्धा 'to turn to the subject under *discussion.*' प्रस्तावः, प्रस्तुत-प्रकृत-विषयः; प्रस्तुतं, प्रकृतं 'the subject under *discussion.*'

तपस्विव्यंजनोपेताः, तापसच्छद्मना, तापसरूपधारिणः '*disguised* as ascetics.'

निष्कारणो बन्धुः 'a *disinterested* friend.'

मम द्रव्यस्य कथं त्वया विनियोगः कृतः 'how have you *disposed* of my money.' अहं त्वदधीनोस्मि 'I am at your *disposal.*' अयमर्थस्त्व-दायत्तः, अत्र भवान् प्रभवति 'this matter is at your *disposal*' कलहशीलं, कलहकाम '*disposed* to quarrel.'

किं वो विवादवस्तु 'what are you *disputing* about,' 'what is the matter at issue.' वादग्रस्तोर्थः 'a *disputed* point.'

अतिथिविशेषः 'a *distinguished* guest.'

एवं तावदाक्षिपामि, अन्यतः संचारयामि 'I shall thus *divert* his thoughts.'

अन्तर्भेदाकुलं गृहं 'a house *divided* against itself.'

अपि कुशलं-शिवं भवतः 'how do you *do*,' 'are you *doing* well.' त्वां सुखं-कुशलं पृच्छति 'asks you how you *do.*' देवीं सुखं प्रष्टुमागता 'she came to ask the queen if she was *doing* well.' अलं निर्बंधेन 'have *done* with, enough of, your importunity.' किमस्माकं स्वामिचेष्टानिरूपणेन 'what have we to *do* with watching the movements of our master.'

मनो मे संशयमेव गाहते or आशंकते 'my mind is still in *doubt.*'

नतोन्नतभूमिभागः, उत्खातिनी भूमिः 'ground having ups and *downs*,' 'uneven ground.' पातोत्पातः 'ups and *downs.*' नीचैर्गच्छत्युपरि च दशा चक्रनेमिक्रमेण 'there are ups and *downs* in our condition (in life) as in the course of the wheel.' निपात्यतां-उच्छेद्यतां-असौ प्रजापीडकः '*down* with the tyrant.'

परिणतप्रायमहः 'the day is *drawing* to a close,' 'it is about sun-set.' त्वया स्वहस्तेनांगाराः कर्षिताः 'you have *drawn* down ruin upon yourself with your own hands.'

EFF.

द्वीपिचर्मपरिच्छन्नः गर्दभः 'an ass *dressed* in a tiger's skin.' चापलाय प्रचोदितः '*driven* to do a rash act.' अविरलवारि-धारासंपातः, पटुर्धारासारः 'a sharp *driving* shower.' किमुद्दिश्य भवान्भाषते 'what are you *driving* at.'

मा भवानंगानि मुंचतु 'let not your spirits *droop* (flag), do not despair.' मुक्तैरवयवैरशयिषि 'I slept with *drooping* limbs.' स्रंसते देहबंधः 'the whole frame *droops* down.'

जलबिन्दुनिपातेन क्रमशः पूर्यते घटः 'small *drops* make a pool.' संह्रियतामियं कथा 'let this matter (story) be *dropped.*' अवसन्नप्रायाणि मे गात्राणि, सीदन्ति मे अंगानि, 'I feel ready to *drop* down.'

शिखी केकाभिस्तिरयति मे वचनं 'the peacock *drowns* my voice with his cries.'

E

श्रवणगोचरे तिष्ठ 'be within *ear*-shot.'

महति प्रत्यूषे '*early* in the morning.'

न परिहसामि, नायं परिहासस्य समयः 'I am in earnest, 'I am not joking.' परमार्थेन ग्रह 'take in *earnest.*'

लब्धं स्वास्थ्यं मया, अहं निर्वृतः, वीतचिंतः 'I am at *ease.*' जातो मयायं विशदः प्रकामं अन्तरात्मा 'this my soul is completely at *ease.*' यथाकामं, पर्याप्तं, प्रकामं 'at one's *ease.*' सुखसुप्त 'sleeping at *ease.*'

दन्तहर्षः 'setting the teeth on *edge.*'

फल् मूर्च्छ् (1 P.) 'to take *effect.*' मारुतस्य रंहः शिलोच्चये न मूर्च्छति 'the velocity of the wind has no *effect on* (prevails not against) a mountain.' मूर्च्छंत्यमी विकारा ऐश्वर्यमत्तेषु 'such changes of purpose take *effect* (grow strong) in persons intoxicated with sovereign power.' निशि मूर्च्छतां तमसां 'of darkness thickening at night.' वज्रं तपोवीर्यमहत्सु कुंठं 'the thunder-bolt has no *effect* on those who have practised austere penance.' इति, एतदभिप्राय 'to this *effect.*' अर्थतः, वस्तुतः 'in *effect.*'

EXC

नृपस्तस्यां बद्धभावः, कृतानुरागः, प्रीतिं-भावं बबन्ध 'the king was *enamoured* of her,' 'fixed his love on her.'

शृणु मे सावशेषं वचः 'hear my speech to the *end* (hear me out).' कल्याणोदर्कं-स्वन्तं-भविष्यति 'it will *end* in good.'

अलमतिविस्तरेण '*enough* of prolixity.' अलं-कृतं-परिहासेन *enough* of joking.'

कुतूहलेन तस्य चेतसि पदं कृतं 'curiosity *entered* his heart.'

मानमर्हति, मान्य, पूज्यः 'he is *entitled* to respect.' स पुरस्कार-मर्हति 'he is *entitled* to precedence.'

परसुखासहिष्णु '*envious* (jealous) of another's happiness.' ते परस्परयशःपुरोभागाः 'they are *envious*, jealous, of each other's fame.'

तुलया धृ 'to consider *equal*.' तत्कार्यं साधयितुमलं सः 'he is *equal* to the task.'

प्रतिशासनं 'sending on an *errand*.'

बन्धनभ्रष्टो गृहकपोतश्चिल्लाया मुखे पतितः 'he has *escaped* one danger only to fall into another (has *escaped* Scylla to fall into Charybdis).' कथं कथमपि मुक्तः 'he narrowly *escaped*.'

सुरक्षितां तां प्रेषय 'send her a good *escort*.'

अत्यन्तविलुप्तदर्शन 'disappeared for *ever*.' एकान्तनष्ट 'lost for *ever*.' असन्निवृत्त्यै गत, अत्यन्तगत 'gone for *ever*.' अप्रबोधाय सा सुष्वाप 'she slept not to *ever* wake again (to wake no more).'

अब्रह्मण्यं, अत्याहितं 'Oh! an *evil* has befallen,' alas, woe me.

स सत्कारो मम मनोरथानामप्यभूमिः 'the reception *exceeded* even my expectations.'

उत्सर्गाः सापवादाः 'rules have *exceptions*.' अपवादैरिवोत्सर्गाः कृतव्यावृत्तयः 'as general rules are limited by *exceptions*.' अव्यभिचारी तद्वचः, इति लोकवादः न विसंवादमासादयति 'that saying has no *exception*.' प्रतिप्रसवः 'counter-*exception*.'

शिरःशूलस्पर्शनमपदिशन् 'pleading an *excuse* of headache.' अनामयापदेशेन 'under the *excuse* of illness.'

FAR

स्वनियोगमशून्यं कुरु, अनुतिष्ठात्मनो नियोगं '*execute* thy business,' 'do thy duty.'

असौ क्रमाद्यौवनभिन्नशैशवः 'his boyhood gradually *expanded* into youth.' हर्षोत्फुल्लनयनः 'with his eyes *expanded* with joy.'

भवतात्मा क्लेशस्य पदमुपनीतः 'you *exposed* yourself to trouble.' स कातर इति वाच्यतां गतः 'he was *exposed* to the charge of cowardice.' सा तण्डुलान् सूर्यातपे दत्तवती, आतपायोज्झितवती 'she *exposed* rice to the sun.'

कियताप्यंशेन, ईषत्, मनाक् 'to some *extent*.' सर्वथा 'to the fullest *extent*.'

लोकदृष्ट्या 'in the *eyes* of the public.' अक्षिगतोऽहं तस्य 'I am an *eye*sore to him.'

F

मुखामुखि, संमुखं '*face* to *face*.' पूर्वाभिमुखं गृहं 'a house *facing* the East.'

वस्तुतः, तत्त्वतः 'in *fact*.' वस्तुवृत्तेन, परमार्थतः, तत्त्वतः 'as a matter of *fact*.'

संकटेष्वविषण्णधीः 'his talent *fails*' not in difficulties.' फले विसंवदति '*fails* to give the fruit.' रमणीयोऽवधिर्विधिना विसंवादितः 'a good appointment was made to *fail* by Fate.' तस्य धैर्यं न हीयते, न स्खलति 'his courage does not *fail* him.' पुत्राभावे '*failing* male issue.' तस्य स्मृतिलोपः संजातः 'his memory *failed* him. सन्ततिविच्छेदः–लोपः '*failure* of issue.'

अनिर्वेदः श्रियो मूलं '*faint* heart never won fair lady.'

सुदिनं 'a *fair* day or weather.'

पातोत्पातौ, व्यसनोदयौ 'rise and *fall*.' स लक्ष्यच्युतसायकोऽभूत् 'his arrow *fell* short of its aim.' तव महिमानमुत्कीर्त्य वचः संन्ह्रियते 'words *fall* short in describing your greatness.'

लुप्तप्रतिज्ञ, असत्यसंध, भग्नप्रतिज्ञ '*false* to one's promise.'

अतिपरिचयादवज्ञा '*familiarity* breeds contempt.'

को वृत्तान्तस्तत्रभवत्याः 'how *fares* it with her ladyship.,

FUL

नात्र मुनिर्दोषं ग्रहीष्यति 'the sage will not find *fault* with this.' दृष्टदोषा मृगया 'chase is found *fault* with.'

सहृदयः, सचेताः 'a man of *feeling*.' स चेतसः कस्य मनो न दूयते 'what man of *feeling* is not affected at heart.'

आत्मानं मृतवत्संदर्शयामास 'he *feigned* himself to be dead.' कृतकं कोपं कृत्वा '*feigning* anger.' प्रसुप्तलक्षण, व्याजसुप्त, लक्षसुप्त '*feigning* sleep.'

पर्याप्तमाचामति 'drinks (his) *fill*.'

तैः सोपराधी स्थापितः 'they *found* him guilty.'

उदारः-प्रथमः कल्पः 'a *fine* or fair proposal.'

सुश्लिष्टमेतत् 'this *fits well*.'

मन्मुखासक्तदृष्टिः 'with his eyes *fixed* on my face.' आसक्त-बद्ध-दृष्टि 'having the gaze *fixed*.' स्तिमित-अनिमेष-लोचन 'with a *fixed look*.' मनो निष्ठाशून्यं भ्रमति 'the mind devoid of *fixedness* rambles.'

रंध्रान्वेषिन्, छिद्रान्वेषिन् 'seeking or finding *flaws*, or picking holes.'

सप्तभूमिकाः प्रासादः 'a palace having seven *floors*.'

हस्तौ समानीय, अंजलिं बध्द्वा, कृताञ्जलिः, सां (प्रां) जलिः '*folding* his hands together.' भुजाभ्यां तामापीड्य '*folding* her in his arms.'

महतां पदमनुविधेयं '*follow* (in) the foot-steps of the great.' पदवीं प्रतिपद्य '*following* the path.' पुरस्कृतमध्यमक्रमः '*following* a middle course.' दुःखं दुःखानुबन्धि, विपद्विपदमनुबध्नाति 'one misfortune *follows* another.' अतः किं प्राप्नोति 'what *follows* from this!' परस्तादवगम्यते 'what *follows* is understood.' ततस्ततः 'what *followed* next,' proceed. तद्यथा 'it is as *follows*.'

शान्तं पापं, प्रतिहतं अमंगलं 'God *forbid* (forfend).'

स्वनामत्यागं करोमि 'I shall *forego* my name.'

तीर्ण-पूर्ण-प्रतिज्ञः, पालितसंगरः, सत्यप्रतिज्ञः, सत्यव्रतः-संधः 'who has *fulfilled* his promise.'

G

HAN

अधुना मुंच शय्यां '*get* out of (leave) bed now.'

युद्धाय संनद्धाः or बद्धपरिकरास्ते 'they have *girded* up their loins for battle.'

शुचो वशं मा गमः, शोकाधीनः मा भूः, वैक्लव्यं मावलंबस्व 'do not *give* way to grief.'

ज्वलन्निव ब्रह्ममयेन तेजसा 'as if *glowing* with Brâhmanic lustre.'

इति ख्यातः, कृतनामधेयः, दत्तसंज्ञः 'he *goes* by the name of.' उमाख्यां सा जगाम 'she went by the name of Umà.'

किं तया दृष्टया, कोर्थस्तस्या दर्शनेन 'what is the *good* of seeing her.' अलं परिदेवनेन 'what *good* do you get by weeping.'

मृत्योर्मुखे वर्तते, कालालीढः, मृत्युगोचरं गतः 'he is within the *grasp* of death. इदं च अशेषविद्याग्रहणसामर्थ्यं 'and this *grasp* of every (kind of) learning.' ममाशयं सम्यग्गृहीतवानसि 'you have well *grasped* my meaning.'

आनन्दस्य परां कोटिं-काष्ठां अधिगतः 'he was *greatly* delighted.'

रोषात् दन्तैर्दन्तान्निष्पिष्य '*grinding* the teeth in rage.'

यौवनपदवीमारूढः, प्राप्तयौवनः, यौवनदशामापेदे 'he *grew* up to man's estate (attained majority). वत्सतरः महोक्षतां स्पृशति, महोक्षभावं श्रयति a calf *grows* into a large bull.'

तस्याः आबद्धधारमश्रु प्रावर्तत, उद्बाष्पे नयने जाते 'ears *gushed* forth from her eyes in torrents.'

H

चौर्यवृत्ति 'in the *habit* of stealing.' ज्ञातदुःख, दुःखशील, परिचितक्लेश '*habituated* to distress.'

रेखामात्रमपि 'even a *hair's* breadth.'

सर्वनाशे समुत्पन्ने अर्धं त्यजति पण्डितः '*half* a loaf is better than no bread.'

नियुद्धं, बाहुयुद्धं '*a hand*-to *hand* fight.' एकतः-अन्यतः, एकं च-अपरं च 'on the one *hand*—on the other *hand*.' तु, तावत् 'on

the other *hand.*' सर्वथा, सर्वत्र 'on all *hands.*' दत्तहस्तावलंब "given a helping *hand.*' परंपरया आगम् 'to be *handed* down.'

त्रिशंकुरिवांतरा तिष्ठ '*hang* between' (like Tris'anku).

आवेदयन्ति प्रत्यासन्नमानन्दं अग्रजातानि शुभानि निमित्तानि 'antecedent good omens are *harbingers* of coming happiness' (*Cf.* coming events cast their shadows before.)

अहो दारुणो दैवदुर्विपाकः 'Oh *hard* fate.' प्रबलक्षुधावसन्न '*hard* pressed by hunger.'

तव मुखं कमलश्रियमुद्वहति-आहरति- 'your face *has* the beauty of a lotus.'

संशयितजीवितः 'who *hazards* his life.'

धुरि कीर्तनीय or प्रतिष्ठापयितव्य 'to be placed at the *head* of.' स सर्वेषां धुरि-मूर्ध्नि-तिष्ठति' he stands at the *head* of all.' वसिष्ठाधिष्ठिताः-वसिष्ठपुरःसराः-प्रमुखाः पुरोगमाः '*headed* by Vas'istha.'

व्रणविरोपणं तैलं 'sore-*healing* oil.'

सुस्थोसौ, कुशलमस्य 'he is in good *health*.' पूर्ववत्-प्रकृतिस्थः समजायत 'became as *healthy* as before.'

किमस्मान् संभृतदोषैरधिक्षिपथ 'why do you *heap* accusations (calumnies) upon us.'

इति कर्णपरंपरया श्रुतमस्माभिः 'we know it by *hearsay.*'

सोत्साहं, सर्वात्मना 'with all one's *heart.*' सर्वात्मना तस्मिन्कर्मणि स व्यापृतः 'he has applied himself to the work, *heart* and soul.' यथेच्छं, पर्याप्तं, प्रकामं, निकामं 'to one's *heart*'s content.'

दीर्घं-स्थूलस्थूलं-निश्वस्य '*heaving* deeply.'

भूस्वर्गायमानमेतत्स्थलं, भूलोकगतः स्वर्गः 'this is a *heaven* on earth.'

अहमनुपदमागत एव 'I shall be close upon your *heels,*' 'I shall just follow you.' जंघामवलंब् 'to take to one's heels.

विनापुरुषकारेण दैवं न सिध्यति 'God *helps* those, who help themselves.' का गतिः, किमन्यच्छरणं 'I can't help.'

हंत बीभत्समेवाग्रतो वर्तते 'yonder is indeed a *hideous* spectacle.'

स त्वां बहुमन्यते 'he has a *high* opinion (thinks highly) of you.'

IMP

इषवः सिध्यन्ति लक्ष्ये चले 'arrows *hit* a moving mark.'

का कियती मात्रा तेषां मम, तानहं तृणाय मन्ये or तृणीकरोमि 'I *hold* them of no account.' वाचंयमो भव, वाचं नियच्छ, तूष्णीं जोषं आस्स्व '*hold* your tongue.' सर्वगामी-अव्यभिचारी अयं नियमः 'this rule *holds* good everywhere.' मुक्तग्रह- 'letting go the *hold.*' रागः शुक्लपटे स्थायी भवति, 'red colour takes a firm *hold* on a white cloth.' स लोकस्य मन आददे 'he had a *hold* on the mind of the people (drew the mind of the people towards himself).' लेभेंतरं चेतसि नोपदेशः, अपलब्धपदो हृदि 'the advice took no *hold* (was not impressed) on the mind.'

तद्वचः तस्य हृदयमर्मास्पृशत् 'the words went *home* to his heart.'

चतुरः शशकान् विश्वासस्थाने धृत्वा 'retaining four hares as *hostages*.'

मानुषीं गिरमुदीरयामास 'uttered *human* accents.'

इति राज्ञां शिरसि वामपादमाधाय 'thus completely *humbling* the kings.'

I

ब्रह्मसायुज्यं प्राप्तः, ब्रह्मलीनः, ब्रह्मभूयं गतः 'becoming *identical* (one) with Brâhman.'

दुर्दैवं, दुर्भाग्यं, मन्दभाग्यं, दैवविपर्यासः-दुर्विपाकः '*ill* luck.'

अस्मार्तकालात् 'from times *immemorial.*'

स महति जीवितसंशये अवर्तत 'he stood in *imminent* peril of death.'

अलं सेवया (स्नेहभणितेन) मध्यस्थतां गृहीत्वा भण 'away with flattery, speak *impartially.*'

उन्नमत्यकालदुर्दिनं 'an untimely storm *impends.*' अनावृष्टिः संपद्यते लग्ना 'a drought is closely *impending.*'

निर्बन्धपृष्टः or पुनः पुनश्चानुबध्यमानः स जगाद सर्वं 'being *importuned* (pressed), he told all.'

INT

जानकी करुणस्य मूर्तिरथवा शरीरिणि विरहव्यथेव 'Jànakî is the Karuna sentiment or pang of separation *incarnate*.'

वाच्यतां याति, दोषभाजनं-दोषभाक्-दोषपात्रं-भवति. 'he *incurs* blame.'

किं कथ्यते श्रीरुभयस्य तस्य 'the splendour of that pair is simply *indescribable* (what words can describe their splendour).

संभावनीयानुभावास्याकृतिः 'his dignity may be *inferred* from his form.' आकृतिरेवानुमापयत्यमानुषतां 'her very form leads (one) to *infer* her being superhuman.'

अधरोत्तरव्यक्तिर्भविष्यति 'it will be clear who is *inferior* and who is superior.' ओजस्वितया सा न परिहीयते शच्याः 'she is not *inferior* to S'achi in majestic dignity.' न प्रतिच्छन्दात्परिहीयते मधुरता '(her) loveliness is not *inferior* to (does not fall short of) that in the picture.'

अमी विनोदनोपायाः संदीपना एव दुःखस्य 'these diversions will only serve to *inflame* grief.'

दर्पध्मात, मदोद्धत, उत्सिक्त '*inflated* with pride.'

निद्रावश-विधेय 'under the *influence* of sleep.' मूढः परप्रत्ययनेयबुद्धिः 'a fool has his mind *influenced* by the convictions of others.'

पुरुषोत्तमे इति भणितव्य '*instead* of saying *on Purushottama*.' अध्ययने आरब्धव्ये किमिति क्रीडसि '*instead* of studying why do you play?' हर्षस्थाने अलं विषादेन 'be not sorry *instead* of being (where you should be) glad.'

परोपकरणीकृत-भूत 'serving as the *instrument* of others.' उपकरणीभावमायात्येवंविधो जनः 'such persons become helping *instruments*.'

चक्रवृद्धिः 'compound *interest*.' सरला वृद्धिः 'simple *interest*.' पंचकेन शतेन, पंचोत्तरं शतं '*interest* at five per cent.' दृष्टं युष्माभिः कथारसस्याक्षेपसामर्थ्यं 'you have seen how the *interest* of the story made me disgress.' स्वार्थपर, स्वार्थदृष्टि 'looking

to one's own *interest.*' अतिरमणीयं कथावस्तु 'the subject-matter of the story is very *interesting.*' पक्षपातिनौ आवामनयोः 'we two are (respectively) *interested* in these two.'

न चेदन्यकार्यातिपातः 'if it should not *interfere* with other duties.' अव्यापारेषु व्यापारं स करोति 'he *interferes* in matters not his own.'

मैनमन्तरा प्रतिबध्नीत 'do not *interrupt* him.'

काले काले, अन्तरा अन्तरा 'at *intervals.*'

श्रमसहिष्णु, जितश्रम '*inured* to fatigue.'

नायमेकान्तो नियमः 'this is not an *invariable* rule.'

रामस्य दैवदुर्नियोगः कोपि 'it was a sad *irony* of fate in the case of Ràma.'

J

परिहासविजल्पित, नर्मभाषित 'uttered in *jest.*'

अध्वसंजातखेदात् 'on account of the fatigue of *journey.*' उत्थाय पुनरवहत् 'he resumed his *journey.*' सप्ताहगम्योऽध्वा 'it is only a week's *journey.*'

स्वगृहनिर्विशेषमत्र वस 'stay here *just* as in your own house.'

स्वपुत्रनिर्विशेषं संवर्धित 'brought up *just* like one's own sons.'

K

जानुभ्यां अवनौ गम् or पत 'go or fall on the *knees.*' जानु-दघ्न-द्वयस-मात्र '*knee*-deep.'

भ्रुकुटिं बंध् or रच्, भ्रुवौ संकुच् or भिद् '*knit* the eyebrow.'

बुद्धिर्यस्य बलं तस्य '*knowledge* is power.' तदाख्यया भुवि पप्रथे, तदाख्यां जगाम 'became *known* by that name.'

L

चिन्ताशतैर्बाध्यमान अभिभूत '*labouring* under hundreds of anxieties.'

प्रतस्थे स्थलमार्गेण-वर्त्मना 'proceeded by land.'

अलसेक्षण 'with *languishing* looks.'

LIE

एष ते जीवितावधिः प्रवादः 'this talk will *last* through life.' कतिपयदिवसस्थायिनी यौवनश्रीः 'the bloom of youth *lasts* for a few days.' कालान्तरक्षमा माला 'a garland capable of *lasting* for a long time.'

आर्गलानिरुद्धं पक्षद्वारं 'the postern door was on the *latch*.'

किमिति चिरायितं त्वया, वेलातिक्रमः कृतः 'why are you *late*.'

मुहूर्तं तत् आस्तां, तिष्ठतु तावत् '*lay* it aside for a while.'

विषयसुखनिरतो जीवितमत्यवाहयत् '*led* a dissolute life.' चित्रकूटयायिनि वर्त्मनि 'on the way *leading* to Chitrakûta.' अयं पन्था नदीमुपतिष्ठते 'this way *leads* to the river.'

अनुदिवसं परिहीयसेऽङ्गैः 'you are growing *leaner* and *leaner* day by day' (you are gradually wasting away). मदलेखया दत्तहस्तावलंबा *leaning* on Madalekhâ's arm.' वामहस्तोपहितवदना '*leaning* her face on her left hand.'

त्र्यवराः साक्षिणो ज्ञेयाः 'there should be at *least* three witnesses.'

अस्मास्ववहीनेषु 'we being *left* behind.' शान्ते पानीयवर्षे 'when it *left* off raining.'

सुखमुपदिश्यते परस्य 'it is easy to advise or read *lectures* to others.'

लब्धावकाश, प्राप्तावकाश, निर्व्यापार, लब्धक्षण 'being at *leisure*.

परित्रायस्वैनां मा कस्यापि तपस्विनो हस्ते पतिष्यति 'secure her *lest* she fall into the hands of some ascetic.'

भूमिसात्कृ 'to *level* to the ground.' दरिद्रसनतां नीत-गमित 'reduced to the *level* of the poor.'

मनुष्याः स्खलनशीलाः 'man is *liable* to err.'

यदत्रावसरप्राप्तं तत्र प्रभवति भवती 'your ladyship is at *liberty* to do what befits the occasion.' बन्धे मोक्षे चाधुना सा ते प्रभवति 'now she is at *liberty* to detain or set you free.'

सर्वथा त्वमेवात्र दोषभाक् 'the fault *lies* with you entirely.' सखीगामी अयं दोषः 'this fault *lies* with my friend.'

MAS

प्राणयात्रा-धारणं-रक्षणं 'support of *life*.' साधुवृत्त 'leading a virtuous *life*.' दशान्तराणि 'the vicissitudes of *life*.'

अनया दृष्टचा 'considered in this *light*.'

एवमादि 'this and the *like*.' यस्ते छन्दः, यद्भवते रोचते 'just as you *like*.' कामचार, स्वच्छन्द, स्वैरिन्, कामवृत्ति 'doing as one *likes*.' कामरूपः 'taking what form he *likes*.' यथाभिलषितं क्रियतां 'do as you *like*.' स न तस्या रुचये बभूव 'he was not to her *liking*.'

अल्पविषय 'of narrow *limit* (scope).' तस्य यश इयत्तया परिच्छेत्तुं नालं 'no (definite) *limit* can be set to his fame.' न गुणानामियत्तया 'not through the *limited* nature of merits.'

यावदहं ध्रिये 'as long as I *live*.' वन्यफलैः शरीरवृत्तिं निर्वर्तयति '*lives* on wild fruit.' स्मार्ते काले 'within *living* memory.'

राजकुले-राज्ञे-निविद् *caus.* 'to *lodge* a complaint,' 'to file a suit.'

नयनैः-दृष्टिभिः-पा,निर्ध्यै 'to *look* intently at.' तत्साहसाभासं 'that *looks* like wantonness.' जनन्या मे योगक्षेमं वहस्व, जननीमवेक्षस्व-चिन्तय '*look* after (look to the well-being, take care of) my mother.'

विगतासुर्बभूव, प्राणैरहीयत 'he *lost* his life.' मित्रैर्वियुज्यते 'he *loses* his friends.' उन्मार्गगामी अभूत् 'he *lost* his way.' च्युताधिकार—अधिकारभ्रष्ट 'who has *lost* his office. किंकर्तव्यताप्रतिपत्तिमूढ 'being at a *loss* what to do.'

उपनम्, उपस्था 'fall to the *lot* of.' तव दुःखमुपनमेत् 'misery will be your *lot*.' कस्यात्यन्तं सुखमुपनतं 'to whose *lot* (share) does perpetual happiness fall.'

M

दोषमपि गुणत्वमुपपादयितुं 'to *make* the best of a bad matter.' लक्ष्यभेदः 'hitting the *mark*.'

अप्रभुरस्मि आत्मनः, न प्रभवाम्यात्मनः, गात्राणामनीशोऽस्मि संवृत्तः 'I am not *master* of myself.' सकलशास्त्रपारंगतः, शास्त्रपारदृश्वा 'who has completely *mastered* all sciences.' गतोऽसि सर्वास्वायुध,

MIS

विद्यासु परां प्रतिष्ठां 'you have attained perfect *mastery* over all sciences of arms.'

आवां प्रतिद्वंद्विनौ भवाव 'let us (two) make a *match.*' दैत्येभ्यो हरिरलं 'Hari is a *match* for the demons.' अतीत्य-अतिक्रम्यवृत् 'to be more than a *match* for.' तुल्यप्रतिद्वंद्वि बभूव युद्धं 'it was well-*matched* fight.'

यत्किंचित्करमेतत् 'it does not much *matter.*' किं तस्या वृत्तं कस्तस्या वृत्तांत: 'what is the *matter* with her.' किं मम तेन कार्यं-कोर्थः 'what *matters* it to me.' सन्निधानस्य अकिंचित्करत्वात् 'proximity being not *material.*'

परिणतप्रज्ञ, कठोरधी 'of *matured intellect.*'

साकूतं मां निर्वर्ण्य 'casting at me a *meaning* look.'

प्रत्युद्+या-व्रज्-गम्-इ 'go out to *meet.*' प्रत्युत्था, अभ्युत्था 'to rise to *meet.*' आपः संप्लवन्ते-संभिद्यन्ते 'waters *meet.*'

तस्य हृदयं स्नेहार्द्रीभूतं, स्नेहेनाभ्यष्यंदत 'his heart was *melted* with affection.'

मेधाविन्, धारणावत् 'having a retentive *memory.*' स्मृतिविषयतां-स्मृतिपथं-स्मर्तव्यशेषं-कथावशेषं गम् or नी *pass.* 'to remain only in *memory.*'

एको दोषो गुणसन्निपाते निमज्जति 'one fault *merges* in a collection of good qualities.'

चित्त-मनो-व्यापारः-वृत्तिः 'working of the *mind.*' मनसि उत्-इ or उद्भू, बुद्धौ संजन् 'to cross or occur to the *mind*' आस्तां-तिष्ठतु-तावत् प्रथमः प्रश्नः 'never *mind* the first question.'

उत्कंठासाधारणं परितोषमनुभवामि 'I fell pleasure *mingled* with egret.'

मार्गात् भ्रष्टः '*missed* his way.'

गोत्रस्खलितं 'a *mistake* in calling by name.' तस्माद् गर्दभाद् व्याघ्रधिया-बुद्धया पशवः पलायन्ते 'animals run away from the ass *mistaking* it for a tiger.'

OCC

आपातरमणीय 'good for the present *moment.*'

खलः सर्षपमात्राणि परच्छिद्राणि पश्यति । आत्मनो बिल्वमात्राणि पश्यन्नपि न पश्यति 'the *mote* thou seest in the eyes of others, but not the beam in thine own.'

तिले तालं पश्यति, अणुं पर्वतीकरोति 'he makes *mountains* of mole-hills.'

अस्मात्स्थानात्पदात्पदमपि न गंतव्यं 'don't *move* even a step further.'

कर्मणो गहना गतिः '*mysterious* are the ways (working) of Fate.'

N

अपि ज्ञायन्ते ते नामधेयतः 'do you know their *names.*'

अस्य मातरं नामतः पृच्छेयं 'I shall ask his mother's *name.*' नामग्राहं मामाह्वयति 'he calls me by my *name.*' वचनेन, वचनात् 'in one's *name.*' वाच्यस्त्वया मद्वचनात्स राजा 'say to the king in my *name.* मामुद्दिश्य तस्मै सभाजनाक्षराणि पातय 'salute him in my *name.*'

मानुषतासुलभो लघिमा 'levity *natural* to mortals.'

दुर्जातबन्धुः 'a friend in *need* (adversity).' स सुहृद् व्यसने यः स्यात् 'a friend in *need* is a friend indeed.'

मालती मूर्धानं चालयति 'Mâlatî *nods* her head.'

ननु शब्दपतिः क्षितेरहं 'I am but a *nominal* lord of the Earth.'

बहुलीभूतमेतद् वृत्तं 'this matter has become *notorious*' (known to all).

यत्नादुपचर्यतामसौ 'let her be carefully *nursed.*'

O

स्नेहस्यैकायनीभूता 'the sole *object* of one's affection.' किमुद्दिश्य, किंनिमित्तं, किमपेक्ष्य फलं 'with what *object* in view.'

प्रत्यर्थिभूता सा समाधेः 'she was an *obstacle* to meditation.'

श्लाघ्ये गृहिणीपदे स्थिता '*occupying* the honourable position of a housewife.'

PAS

इति तस्य बुद्धौ न संजातं, इति तस्य हृदयं नापतितं 'this did not *occur* to his mind.' स्मृत्युपस्थितौ इमौ द्वौ श्लोकौ 'these two verses *occur* to our mind.'

कस्मिन्नपि पूजार्हे अपराद्धा शकुन्तला 'S'akuntalà has *offended* some person worthy of respect.' तव न कदापि मया विप्रियं कृतं, प्रतिकूलमाचरितं 'I have never even once *offended* you.' शीघ्रकोपिन्, सुलभकोप 'easily taking *offence*.'

च्युत-भ्रष्ट-अधिकार 'dismissed from *office*.'

प्रकाशं निर्गतः 'having gone out into the *open* air.' तवोपालंभे पतितास्मि, उपालंभपात्रं जाता 'I laid myself *open* to your taunt.'

गृहीतावसर, लब्धावकाश 'seizing an *opportunity*.'

लोकाचारविरुद्ध, लोकविद्विष्ट '*opposed* to the practice of the world.'

अत्र स्वरुच्या वर्ततां भवान्, यथाभिलाषं क्रियतां 'it is left to your *option*,' or choice.

यथाज्ञापयति देवः 'your Majesty's *orders* will be obeyed.' आनुलोम्यं 'natural *order*.' प्रातिलोम्यं, व्युत्क्रमः, विपर्ययः, व्यत्यासः 'reverse *order*.'

अपह्रिये परिश्रमजनितया निद्रया 'I am *overcome* by sleep caused by fatigue.'

आनन्दपरिवाहिणा चक्षुषा 'with an eye *overflowing* with joy.' प्रथमं कुतूहलं सपरिवाहमासीत् 'my curiosity first *overflowed*.'

P

विवर्णभावं प्रपेदे 'grew or turned *pale*.'

शरीरभूता मे शकुन्तला 'S'akuntalà forms, as it were, a part and *parcel* of my body.'

भूमिकाकल्पनं 'assignment of *parts*.'

तस्य नरस्य विशेषं ब्रूहि 'give the *particulars* of that man.'

तेनाष्टौ परिगमिताः समाः कथंचित् 'he with difficulty *passed* eight years.' इदं धियः पथि न वर्तते 'this *passes* conception.

PLE

आस्तां–तिष्ठतु तदधुना, यातु किमनेन 'let it *pass* now.' किमर्थमगृहीतमुद्रः कटकान्निष्क्रामसि 'why do you leave the camp without (taking) a *pass.*' अमुद्रालांछितः 'without a *pass.*' तया हृदयवल्लभोऽभिलिख्य कामदेवव्यपदेशेन सखीपुरतोऽपह्नुतः 'she *passed* off the picture of her beloved upon her friend as that of Cupid.' मध्यमांबावृत्तान्तोऽन्तरित आर्येण 'the account of the second mother has been *passed* over by his honour.'

जालान्तरप्रेषितदृष्टिरन्या 'another *peeping* through a lattice.'

आज्ञा गुरूणां ह्यविचारणीया 'the command of elderly persons is (to be considered) *peremptory,*' should not be called in question.

नाटकं न प्रयोगतो दृष्टं, प्रयोगेणाधिकृतं न दृष्टं 'the drama has not been seen *performed* (acted) on the stage.'

स्थिरप्रतिबन्धो भव '*persevere* in your opposition.'

आसन्न-शरीर-परिचारकः 'a *personal* attendant,' 'body-guard.' स्वानुभवः '*personal* experience.'

यौवनमंगेषु सन्नद्धं 'youth has *pervaded* the limbs.'

ज्ञायतां कः कार्यार्थीति 'ascertain who are the *petitioners.*'

विरहोत्कंठं हृदयं 'a heart *pining* away in absence.' स गृहं गन्तुमुदताम्यत् 'he *pined* for his home.' अन्तःपुरविरहपर्युत्सुको राजर्षिः 'the royal sage is *pining* by the separation from his wives.'

पितृस्थाने-भूमौ 'in the *place* of a father.' प्रथमं, प्रथमतः, प्रथमं तावत् 'in the first *place.*' अपरं च, पुनः, पुनश्च 'in the next *place.*'

अर्थिन्, वादिन्, अभियोक्तृ '*a plaintiff.*' प्रत्यर्थिन्, अभियुक्तः, प्रतिवादिन् 'a defendant.'

द्वित्राण्यहान्यर्हसि सोढुमर्हन् 'worthy Sir, *please* wait for 2 or 3 days.' यदभिरोचते वयस्याय 'just as my friend *pleases.*' हृदयंगमः परिहासः 'a *pleasant* joke.' सुखश्रव, श्रुतिसुख, श्रवणसुभग मंजुलस्वन '*pleasing* to the ear.'

विहितप्रतिज्ञः-गृहीतक्षणः-अहं 'I have *pledged* my word.'

PRI

अनयोर्वृत्तेयं प्रतिज्ञा 'they two thus *pledged* their word.' तव विरूपकरणे तेन सुकृतमन्तरे धृतं 'he has *pledged* his virtue (honour) that he would not harm you.'

मरणोन्मुख, आसन्नमृत्यु, मुमूर्षु 'on or at the *point* of death.' प्रसवोन्मुखी, आसन्नप्रसवा 'on the *point* of delivery.'

दासी महिषीपदं ग्राहिता, देवीभावं गमिता 'the maid was given the *position* of a queen.'

तदुभयथापि घटते 'it is *possible* in both ways (both sides are *possible*).'

चिरप्रवृत्त 'being long in *practice*.' सदाचार, सद्वृत्त, साधुवृत्त 'following good *practices*.' कां वृत्तिमुपजीवत्यार्यः 'what profession do you *practise?*' प्रयोगः '*practice*' as opposed to शास्त्रं—आगमः 'theory.'

शासनात् करणं श्रेयः, वाचः कर्मातिरिच्यते 'example is better than *precept*.'

स कथयत्यागामिनमप्यर्थं 'he even *predicts* events.'

वरं मृत्युः न पुनरपमानः 'I *prefer* death to disgrace.'

दौर्हृदलक्षणं दधौ 'she showed signs of *pregnancy*.' कठोरगर्भा 'advanced in *pregnancy*.'

त्वयोपस्थातव्यं, सन्निहितेन भाव्यं 'you should be *present*.' समतीतं च भवच्च भावि च 'the past, present, and future.' अग्निं साक्ष्ये आधाय 'in the *presence* of fire.'

तं वक्षसा परिरभ्य-क्रोडीकृत्य '*pressing* him to the bosom.'

भावितविषवेगः '*pretending* to be affected by poison.' अश्रुतिमभिनयति '*pretends* not to hear.' आर्यध्वजिन्-लिंगिन् '*pretending* to be just.'

साक्षी वाक्यभेदान् बहूनकथयत् 'the witness *prevaricated*.'

प्रक्षालनाद्धि पंकस्य दूरादस्पर्शनं वरं '*prevention* is better than cure.'

' द्विषामामिषतां ययौ 'fell a *prey* to enemies.'

प्रथमवयः, नव-अक्षत-यौवनं 'the *prime* of youth.'

REA

ततस्ततः, ततः परं कथय '*procced* with your narrative.' प्रस्तूयतां विवादवस्तु '*proceed* with the matter at issue.' प्रवर्त्यतां भगवतो ब्राह्मणानुद्दिश्य पाकः 'you may *proceed* with your dinner-preparations in honour of the worthy Brâhma*n*as.' किंनिमित्तं ते सन्तापः 'from what cause does thy excitement *proceed?*'

क्षुद्बोधित '*prompted* by hunger.' स सदा प्रत्युत्पन्नमतिः, प्रबोधननिरपेक्षः 'he seldom wants a *prompter*.'

एष सनिकारं नगरान्निर्वास्यते 'here is this person being disgraced and *proscribed* from the city.'

ब्रुवते हि फलेन साधवो न तु कंठेन निजोपयोगितां 'good men *prove* their usefulness by deeds, not by words.'

अनागतविधातृ 'one who *provides* for the future.' आपदर्थे धनं रक्षेत् 'one should *provide* wealth against times of want.'

स्तूयमाना नोत्सिच्यन्ते or अनुद्धताः 'are not *puffed* up when praised.' दर्पाध्मात, उत्सिक्त, अवलिप्त, उद्धत '*puffed* up with pride.'

चौरदण्डेन दण्डयेत् 'he should *punish* (an offender) as a thief.'

Q

अनियन्त्रणानुयोगस्तपस्विजनः 'ascetics may be *questioned* without reserve.'

R

मन्दोप्यविरतोद्योगः सदा विजयभाग्भवेत् 'slow and steady wins the *race*.'

तद्वचो मम हृदये शल्यं जातं 'those words *rankle* in my heart.' स प्रहारः करालतां गतः 'the wound *rankled*.'

वृत्तान्तेन श्रवणविषयप्रापिणा 'by the account *reaching* (her) ears.' इदं प्रायेण तव कर्णपथमायातं-श्रुतिविषयमापतितमेव 'this has probably *reached* your ears.'

प्रत्युत्पन्नमति 'having a *ready* wit,' '*ready*-witted.'

परमार्थतः प्रेम 'affection in the *real* sense of the term.'

RES

धनी उपगतं दद्यात् (धनं) स्वहस्तपरिचिह्नितं 'the creditor shall pass a *receipt* in his own hand.'

दर्शनप्रतिभुवं ददौ 'he entered into a *recognizance* bond.'

तदहं विदधे तव स्तवं दमयन्त्याः सविधे 'I shall, therefore, *recommend* you to Damayantî.'

नाद्यापि प्रसादं गृह्णासि, प्रसन्ना न भवसि 'you are not yet *reconciled.*' वाक्यानि प्रतिसमादधाति '*reconciles* statements.'

कृतकालोपनेयः आधिः 'a pledge to be *redeemed* at a fixed time.'

